This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ पंचोपनिषत् प्रारंभः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चि. १

अथाचित्त्युपनिषत्प्रारंभः । श्रीगजाननप्रसन्नः । । श्रीसरस्वतीप्रसन्नाः । हरिः ॐ॒ त॒च्छं॒योरा॑वृणीमहे । गा॒तुं॒य॒ज्ञाय॑ । गा॒तुं॒य॒ज्ञप॑तये । दैवी॑ः स्व॒स्तिर॑स्तु नः । स्व॒स्ति॒र्मानु॑षेभ्यः । ऊर्ध्वं॑ जिगातु भेष॒जं । शन्नो॑ अस्तु द्वि॒पदे । शं च॒तुं॒ष्पदे । ॐ शांतिः शांतिः । शांतिः । ॐ चि॒ति॒स्रुक् । चि॒त्तमाज्यं॑ । वाग्वेदिः । आधी॑तं॒ब॒र्हिः । केतौ॑ अ॒ग्निः । विज्ञा॑तम॒ग्निः । वाक्प॑ति॒र्होता॑ । मन॑ उपव॒क्ता । प्रा॒णो॒ह॒विः । सामा॑ध्व॒र्युः । वाच॑स्पतेविधेनामन् । वि॒धेम॑ते॒नाम॑ । वि॒धेस्तु॒म॒स्माकं॒न्नाम॑ । वा॒च॒स्पति॒ः सोमं॑पि॒बतु । आस्मासु॑नृ॒म्णंधा॒त्स्वाहा॑ १ अ॒ध्व॒र्युः॑पंचच १ पृ॒थि॒वीहोता॑ । द्यौर॑ध्व॒र्युः । रु॒द्रोग्नीत् । ब॒ह॒स्पति॑रुपव॒क्ता । वाच॑स्पतेवा॒चोवी॒र्यं॑ण । सम्भृ॑ततमे॒नाय॑क्ष्यसे । यज॑मानाय॒वार्यं॑ । आसु॒व॒स्कर॑स्मै । वा॒च॒स्पति॒ः सोमं॑पिबति । ज॒ज॒न॒दिंद्रं॑मिंद्रि॒या य॒स्वाहा॑ १ पृ॒थि॒वीहो॒ता॒दश॑ २ अ॒ग्निर्होता॑ । अ॒श्वि॒नाध्व॒र्यु॑ । त्वष्टाग्नीत् । मि॒त्रउंद व॒क्ता । सोम॒ः सोम॑स्यपुरो॒गाः । शु॒क्रः शु॒क्र॒स्य॑पुरो॒गाः । श्रा॒तास्त॑इंद्र॒सोमा॑ः । वा-

१

तांपे॑हव॒न॒ः श्रु॒त॒ः स्वाहा॑ । अ॒ग्निर्हो॑ता॒ष्टौ ३ सूर्यं॑ते॒ चक्षुः॑ । वातं॑ प्रा॒णः । द्यांपृ॒ष्ठं । अं॒त॒रि॑क्ष॒मा॒त्मा । अं॒गै॒र्य॒ज्ञं । पृ॒थि॒वी॑ शरी॑रैः । वाच॑स्प॒तेछ्छि॑द्रयावा॒चा । अछ्छि॑द्रयाजि॒व्हा । दि॒विदे॒वाबृ॑ध॒ होत्रा॑मे॒र॑यस्व॒स्वाहा॑ ४ सूर्यं॑ते॒नवा॑ ४ म॒हाहं॑वि॒र्होता॑ । स॒त्या हं॑विरध्व॒र्युः । अच्यु॑तपाजाअ॒ग्नीत् । अच्यु॑तमनाउपव॒क्ता । अनाधृ॑ष्यश्चां॒प्रति धृ॒ष्यश्च॑य॒ज्ञस्या॑भिगरौ । अ॒यस्यं॑उद्गाता । वाच॑स्पतेहद्विधेनामन् । वि॒धेम॑ते॒नाम॑ वि॒धेस्त्वम॒स्माकं॒नाम॑ । वा॒चस्पति॒ः सोम॑पात् । मादै॒व्य॒स्तंतुच्छेदि॒माम॑नुष्यः । नमौ॑दि॒वे । नम॑ः पृ॒थि॒व्यै॒स्वाहा॑ १ अपा॒त्रीणिंच ५ वाघो॑ता॑ । दी॒क्षाप॒त्नी॑ । वातौ॑ ध्व॒र्युः । आपौ॑भिगरः । मनो॑ह॒विः । तप॑सिजुहोमि । भूर्भु॒व॒ः सु॒व॑ः । ब्रम्ह॑स्वयं॒भूः ब्रह्म॑णेस्वयं॒भु॒वे॒स्वाहा॑ १ वाघो॒ता॒नवा॑ ६ ब्रा॒म्ह॒ण॒एक॑होता । सय॒ज्ञः । सम॑ैददा॒तु॒ प्र॒जांप॒शून्पु॒ष्टिं॒य॒शः । यज्ञश्च॑मेभूयात् । अ॒ग्निर्द्वि॑होता । सभ॒र्ता । सम॑ैददातु॒ प्र॒ जांप॒शून्पु॒ष्टिं॒य॒शः । भ॒र्ता॒चमे॑भूयात् । पृ॒थि॒वी॒त्रि॑होता । सप्रति॒ष्ठा १ सम॑ैददातु

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रजांपशून्पुष्टियशः। प्रतिष्ठाचमेभूयात्। अंतरिक्षंचतुर्होता। सविष्टाः। समैद
दातुप्रजांपशून्पुष्टियशः। विष्टाश्चमेभूयात्। वायुःपंचहोता। सप्राणः। समैद-
दातुप्रजांपशून्पुष्टियशः। प्राणश्चमेभूयात् १ चंद्रमाःषड्होता। सऋतूनकल्पया-
मि। समैददातुप्रजांपशून्पुष्टियशः। ऋतवश्चमेकल्पंतां। अन्न*सप्तहोता। स-
प्राणस्यंप्राणः। समैददातुप्रजांपशून्पुष्टियशः। प्राणस्यंचमेप्राणोभूयात्। द्यौ
रष्टहोता। सोनाधृष्यः १ समैददातुप्रजांपशून्पुष्टियशः। अनाधृष्यश्चभूयासं।
आदित्योनवहोता। सतैजस्वी। समैददातुप्रजांपशून्पुष्टियशः। तेजस्वीचभू-
यासं। प्रजापतिर्दशहोता। सइद*सर्वं। समैददातुप्रजांपशून्पुष्टियशः। सर्वं
चमेभूयात् ४ प्रतिष्ठाप्राणश्चमेभूयादनाधृष्यः। सर्वंचमेभूयात् ४ ब्राम्हणोय-
ज्ञोग्निर्भर्ता। पृथिवीप्रतिष्ठांतरिक्षंविष्ठा। वायुःप्राणश्चेंद्रमाऋतूनन्न*सप्राणस्य
प्राणोद्यौरनाधृष्यआदित्यः। सतैजस्वीप्रजापतिःसइद*सर्व*सर्वंचमेभूयात्।

१ अग्निर्यज्ञोभिं। सवितास्तोमैः। इंद्रउक्थामदैः। मित्रावरुणावाशिषा। अंगिर
सोधिष्णियैराग्निभिः। मरुतःसदोहविर्धानाभ्यां। आपःप्रोक्षणीभिः। औषधयो
बर्हिषा। अदितिर्वेद्या। सोमोदीक्षया। अदितिर्वेद्या। सोमोदीक्षया। त्वष्टेध्मेन।
विष्णुर्यज्ञेन। वसवआज्येन। आदित्यादाक्षिणाभिः। विश्वेदेवाऊर्ज्जा। पूषास्वंगा
कारेण। बृहस्पतिःपुरोधया। प्रजापतीरुद्गीथेन। अंतरिक्षंपवित्रेण। वायुःपात्रैः।
अह*श्रद्धया २ दीक्षयापात्रैरेकंच ८ सेनेंद्रस्य। धेनाबृहस्पतेः। पथ्यापूष्णः। वा
ग्वायोः। दीक्षासोमस्य। पृथिव्यग्नेः। वसूनांगायत्री। रुद्राणांत्रिष्टुप्। आदित्यानां
जगती। विष्णोरनुष्टुक् १ वरुणस्यविराट्। यज्ञस्यपंक्तिः। प्रजापतेरनुमतीः। मि
त्रस्यश्रद्धा। सवितुःप्रसूतिः। सूर्यस्यमरीचिः। चंद्रमसोरोहिणी। ऋषीणामरुंध
ती। पर्जन्यस्यविद्युत्। चतस्रोदिशः। चतस्रोवांतादिशाः। अहश्चरात्रिश्च। कृषि-
श्चवृष्टिश्च। त्विषिश्चापचितिश्च। आपश्चौषधयश्च। उर्क्चसून्नृतांचदेवानांपत्नी-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः १ अनुष्टुग्दिशः षट्चा १ देवस्यत्वासवितुःप्रसवे । अश्विनोर्बाहुभ्यां। पूष्णो हस्ताभ्यांप्रतिगृह्णामि । राजात्वावरुणोनयतुदेविदक्षिणेग्रयेहिरण्यं। तेनामृतत्व मश्यां । वयोदात्रे । मयोमह्यमस्तुप्रतिग्रहीत्रे । कड्दंकस्मादात् । कामः कामाय । कामोदाता १ कामः *प्रतिग्रहीता । काम *समुद्रमाविश । कामेनत्वाप्रतिगृह्णामि । कामैतत्ते । एषातेकामदक्षिणा । उतानस्त्वाँगीरसः । प्रतिगृह्णातु । सोमायवासः । रुद्रायगां । वरुणायाश्वं । प्रजापतयेपुरुषं १ मनवेतल्पं । त्वष्ट्रेजां । पूष्णेवि । नि-र्ऋत्याअश्वतरगर्दभौ । हिमवतोहस्तिनं । गंधर्वाप्सराभ्यःमृगलंकरणे । विश्वेभ्यो देवेभ्योधान्यं । वाचेन्नं । ब्रह्मणओदनं । समुद्रायापः ३ उत्तनायाँगीरसायानः । वै-श्वानरायरथं । वैश्वानरःप्रथानाक्रमारुहत् । दिवपृष्ठंभंदमानःसुमन्मभिः । स-पूर्ववज्जनयंजंतवेधनं । समानमंज्मापरियातिजाग्रविः । राजात्वावरुणोनयतुदे-विदक्षिणेवैश्वानरायरथं । तेनामृतत्वमश्यां । वायोदात्रे । मयोमह्यमस्तुप्रतिग्रही

त्रे । कड्दंकस्मादात् । कामः कामाय । कामोदाता । कामः प्रतिग्रहीता । काम *समु द्रमाविश । कामेनत्वाप्रतिगृण्हामि । कामैतत्ते । एषातेकामदाक्षिणा । उत्तानस्त्वाँ गीरसः । प्रतिगृण्हातु ५ दातापुरुषप्रापः । प्रतिग्रहीत्रेनवंच १० सुवर्णंघर्मंपरिवे दवेनं । इंद्रस्यात्मानंदशधाचरंतं । अंतःसमुद्रेमनसाचरंतं । ब्रह्मान्वविदद्दशहो तारमर्णं । अंतःप्रविष्टशास्ताजनानां । एकःसन्बहुधाविचारः । शत *शुक्राणिय त्रैकंभवंति । सर्वेवेदायत्रैकंभवंति । सर्वेहोतारोयत्रैकंभवंति । समानंसीनआत्मा जनानां १ अंतःप्रविष्टःशास्ताजनाना *सर्वात्मा । सर्वाःप्रजायत्रैकंभवंति । च-तुर्होतारोयत्रसंपदंगच्छंतिदेवैः । समानंसीनआत्माजनानां । ब्रह्मेंद्रमग्निंजगतः प्रतिष्ठां । दिवेआत्मा *सवितारंबृहस्पतिं । चतुर्होतारंप्रदिशोनुकृप्त । वाचोवीर्यं तपसान्वविंदत् । अंतःप्रविष्टंकर्तारमेतं । त्वष्टार *रूपाणिविकुर्वंतंविपश्चिं २ अ मृतस्यप्राणंयज्ञमेतं । चतुर्होतृणामात्मानंकवयोनिचिक्युः । अंतःप्रविष्टंकर्तार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेतं । देवानांबंधुनिहितंगुहासु । अमृतेनकृत्तंयज्ञमेतं । चतुर्होतृणामात्मानंकृव-
योनिचिक्युः । शतंनियुतःपरि । वेदविश्वाविश्ववारः । विश्वमिदंवृणाति । इंद्रस्या
त्मानिहितःपंचहोता । अमृतंदेवानामायुःप्रजानाँ३इंद्र*राजान*सवितारमेतं ।
वायोरात्मानंकृवयोनिचिक्युः । रश्मि*रश्मीनांमध्येतपंतं । ऋतस्यपदेकृवयो
निपांति । यआँडकोशेभुवनंबिभर्ति । अनिर्भिण्णःसन्नथलोकान्विचष्टे । यस्याँ-
डकोश*शुष्ममाहुःप्राणामुल्बं । तेनैकृत्तोमृतेनाहमस्मि । सुवर्णकोश*रजसापरी
वृतं । देवानांवसुधानीँविराजँ ४अमृतस्यपूर्णांतामुकलांविचक्षते । पाद*षड्होतुर्न
किलाविवित्से । येनर्त्तवःपंचधोतकृप्तः । उतवाषडधामनसोतकृप्ताः । त*षड्होता
रमृतुभिःकल्पमानं । ऋतस्यपदेकृवयोनिपांति । अंतःप्रवीष्टंकर्तारमेतं । अंतश्चंद्र
मांसिमनसाचरँतं । सहैवसंतंनविजानंतिदेवाः । इंद्रस्यात्मान*शतधाचरँतं५इंद्रो
राजाजगतोयइँशे । सप्तहोतासप्तधाविकृप्तः । परेणतंतुंपरिषिच्यमानं । अंतरांद्रि

त्येमनसाचरँतं । देवाना*त्हृदयंब्रह्मान्वविंदत् । ब्रम्हैतत्ब्रह्मणउज्जभार । अर्क
*श्चोतँत*शरिरस्यमध्यै । आयस्मिन्त्सप्तपेरवः । मेहँतिबहुला*श्रियँ । बृहश्वा
मिँद्रगोमतीं ६अच्युतांबहुला*श्रियँ । सहरिर्वसुवित्तमः । पेरुरींद्रायपिन्वते । बृ-
हश्वामिँद्रगोमतीं । अच्युतांबहुला*श्रियँ । मह्यामिंद्रोनियंछतु । शत*शताअस्य
युक्ताहरीणां । अर्वाङ्गाथांतुवसुभिरश्विमरिंद्रः । प्रम*हमाणोबहुला*श्रियँ । रश्मिरिं
द्रसवितामेनियंछतु ७घृतंतेजोमधुमदिंद्रियं । मय्ययमग्निर्दधातु । हरिंःपतंगःप
टरीसुपर्णः । दिवीक्षयोनभसायएंति । सनइंद्रःकामवरंददातु । पंचारंचक्रंपरिव
र्तेपृथु । हिरँण्यज्योतिःसरिरस्यमध्यै । अजस्रंज्योतिर्नभसासपँदेति । सनइंद्रः
कामवरंददातु । सप्तयुंजंतिरथमेकंचक्रं ८एकोअश्वोवहतिसप्तनामा । त्रिनाभिच
क्रमजरमनर्वं । येनेमाविश्वाभुवनानितस्थुः । भद्रंपश्यँतउपसेदुरग्रे । तपोदीक्षा
मृषयःसुवर्विदः । ततःक्षत्रंबलमोजश्चजातंतदस्मैदेवाअभिसन्नमंतु । श्वेत*र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इंमभोभुज्यमानं। अपानेतारंभुवनस्यगोपां। इंद्रंनिचिक्युःपरमेव्योमन्। ९। रोहिणीःपिंगलाएकरूपाः। क्षरंतीःपिंगलाएकरूपाः। शत॑सहस्राणिप्रयुतानि नाव्यानां। अयंयःश्वेतोरश्मीः। परिसर्वंमिदंजगत्। प्रजांपशूंधनानि। अस्मा कंददातु। श्वेतोरश्मिः। परिसर्वंबभूव। सुवन्मह्यंपशून्विश्वरूपान्। पतंगमक्त मसुरस्यमायया १० हृदापश्यंतिमनसामनीषिणः। समुद्रेअंतःकवयोविचक्षते। मरीचीनांपदमिछंतिवेधसः। पतंगोवाचंमनसाबिभर्ति। तांगंधर्वोवदद्गर्भेअंतः तांद्योतमना॑स्वर्यंमानीषां। ऋतस्यपदेकवयोनिपांति। येग्राम्याःपशवोविश्वरू पाः। विरूपाःसंतोबहुधैकरूपाः। अग्निस्ता॑अग्रेप्रमुमोक्तदेवः ११ प्रजापतिः प्रजयासंविदानः। वीत॑स्तुकेस्तुके। युवमस्मासुनियंछतं। प्रप्रयज्ञपतिंतिरा। येग्राम्याःपशवोविश्वरूपाः। विरूपाःसंतोबहुधैकरूपाः। तेषा॑सप्तानामिहरं तिरस्तु। रायस्पोषायसुप्रजास्त्वायसुवीर्यांय। यआरण्याःपशवोविश्वरूपाः। वि

रूपाःसंतोबहुधैकरूपाः १२ वायुस्ता॑अग्रेप्रमुमोक्तदेवः। प्रजापतिःप्रजयां संविदानः। इडायैसप्तंधृतवःश्वराचरं। देवान्वविंदुनगुहाहितं। यआरण्याःपश वोविश्वरूपाः। विरूपाःसंतोबहुधैकरूपाः। तेषा॑सप्तानामिहरंतिरस्तु। राय स्पोषायसुप्रजास्त्वायसुवीर्यांय १३ आत्माजनानांविकुर्वतीविपाश्चिं। प्रजानांव सुधानीविराजंचरंतं। गोमतींमेनियंछत्वेकंचक्रं। व्योमन्माययादेवएकरूपाअ ष्टौच १४ सहस्रशीर्षापुरुषः। सहस्राक्षःसहस्रपात्। सभूमिंविश्वतोवृत्वा। अ त्यतिष्ठद्दशांगुलं। पुरुषएवेद॑सवं। यद्भूतंयच्यभव्यं। उतामृतत्वस्येशानः यद न्नेनातिरोहति। एतावानस्यमहिमा। तोज्याया॑श्चपूरुषः १५पादोस्यविश्वाभूता नि। त्रिपादस्यामृतंदिवि। विपादूर्ध्वउदैत्पुरुषः। पादोस्येहाभवात्पुनः।ततोवि ष्वङ्व्यक्रामत्। साशनानशनेअभि। तस्माद्विराडजायत। विराजोअधिपूरुषः। सजातोअत्यरिच्यत। पश्चाद्भूमिमथोपुरः १६ यत्पुरुषेणहविषादेवायज्ञमतन्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तावसंतोअस्यासीदाज्यं। ग्रीष्मइध्मःशरद्धविः। सप्तास्यासन्परिधयः। त्रिःसप्त समिधःकृताः। देवायद्यज्ञंतन्वानाः। अबध्नंपुरुषंपशुं। तंयज्ञंबर्हिषिप्रौक्षन्। पुरुषंजातमग्रतः १७ तेनदेवाअयजंत। साध्याऋषयश्चये। तस्माद्यज्ञात्सर्वहुतः। संभृतंपृषदाज्यं। पशूꣳस्ताꣳश्चक्रेवायव्यान्। आरण्यान्ग्राम्याश्चये। तस्माद्यज्ञात्सर्वहुतः। ऋचःसामानिजज्ञिरे। छंदाꣳसिजज्ञिरेतस्मात्। यजुस्तस्मादजायत १८ तस्मादश्वाअजायंत। येकेचोभयादतः। गावोहजज्ञिरेतस्मात्। तस्माज्जाताअजावयः। यत्पुरुषंव्यदधुः। कतिधाव्यकल्पयन्। मुखंकिमस्यकौबाहु। कावूरूपादावुच्येते। ब्राह्मणोस्यमुखमासीत्बाहूराजन्यःकृतः १९ उरूतदस्य यद्वैश्यः। पद्भ्यांशूद्रोअजायत। चंद्रमामनसोजातः। चक्षोसूर्योअजायत। मुखादिंद्रश्चाग्निश्च। प्राणाद्वायुरजायत। नाभ्याआसीदंतरिक्षं। शिष्णोद्यौःसमवर्तत। पद्भ्यांभूमिर्द्दिशःश्रोत्रात्। तथालोकाꣳअकल्पयन् २० वेदाहमेतंपुरुषंमहांतं। आदित्यवर्णंतमसस्तुपारे। सर्वाणिरूपाणिविचित्यधीरः। नामानिकृत्वाभिवदन्यदास्ते। धातापुरस्ताद्यमुदाजहार। शक्रःप्रविद्वान्प्रदिशश्चतस्रः। तमेवंविद्वानमृतइहभवति। नान्यःपंथाअयनायविद्यते। यज्ञेनयज्ञमयजंतदेवाःतानिधर्माणिप्रथमान्यासन्। तेहनाकंमहिमानःसचंते। यत्रपूर्वेसाध्याःसंतिदेवाः २१ पूरुषःपुरोयतोजायतकुतोकल्पयन्नासंद्वेच १३ अद्भ्यःसंभूतःपृथिव्यैरसाच्च। विश्वकर्मणःसमवर्तताधि। तस्यत्वष्टाविदधद्रूपमेति। तत्पुरुषस्यविश्वमाजानमग्रे। वेदाहमेतंपुरुषंमहांतं। आदित्यवर्णंतमसःपरस्तात्। तमेवंविद्वानमृतइह भवति। नान्यःपंथाअयनायविद्यते। प्रजापतिश्चरतिगर्भेअंतः। अजायमानोबहुधाविजायते २२ तस्यधीराःपरिजानंतियोनिं। मरीचीनांपदमिच्छंतिवेधसः। योदेवेभ्यआतपति। योदेवानांपुरोहितः। पूर्वोयोदेवेभ्योजातः। नमोरुचायब्राह्मये। रुचंब्राह्मंजनयंतः। देवाअग्रेतदब्रुवन्। यस्त्वैवंब्राह्मणोविद्यात्। तस्यदे

आदित्यवर्णंतमसस्तुपारे। सर्वाणिरूपाणिविचित्यधीरः। नामानिकृत्वाभिवदन्यदास्ते। धातापुरस्ताद्यमुदाजहार। शक्रःप्रविद्वान्प्रदिशश्चतस्रः। तमेवंविद्वानमृतइहभवति। नान्यःपंथाअयनायविद्यते। यज्ञेनयज्ञमयजंतदेवाःतानिधर्माणिप्रथमान्यासन्। तेहनाकंमहिमानःसचंते। यत्रपूर्वेसाध्याःसंतिदेवाः २१ पूरुषःपुरोयतोजायतकुतोकल्पयन्नासंद्वेच १३ अद्भ्यःसंभूतःपृथिव्यैरसाच्च। विश्वकर्मणःसमवर्तताधि। तस्यत्वष्टाविदधद्रूपमेति। तत्पुरुषस्यविश्वमाजानमग्रे। वेदाहमेतंपुरुषंमहांतं। आदित्यवर्णंतमसःपरस्तात्। तमेवंविद्वानमृतइह भवति। नान्यःपंथाअयनायविद्यते। प्रजापतिश्चरतिगर्भेअंतः। अजायमानोबहुधाविजायते २२ तस्यधीराःपरिजानंतियोनिं। मरीचीनांपदमिच्छंतिवेधसः। योदेवेभ्यआतपति। योदेवानांपुरोहितः। पूर्वोयोदेवेभ्योजातः। नमोरुचायब्राह्मये। रुचंब्राह्मंजनयंतः। देवाअग्रेतदब्रुवन्। यस्त्वैवंब्राह्मणोविद्यात्। तस्यदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाअसन्वशै । ह्रीश्चतेलक्ष्मीश्चपत्न्यौ । अहोरात्रेपार्श्वे । नक्षत्राणिरूपं । अश्वि-
नौव्यात्तेंइष्टंमनीषाणा । अमुंमनीषाणा । सर्वैमनीषाणा १ जायतेवशैसप्तचा२३
भर्तासन्भ्रियमाणोबिभर्ति । एकोदेवोबहुधानिवीष्ठः । यदाभारंतंद्रयतेसभर्तुं ।
निधायभारंपुनरस्तमेति । तमेवमृत्युममृतंतमाहुः । तंभर्तारंतमुगोप्तारमाहुः । स
भृतोभ्रियमाणोबिभर्ति । यएनंवेदसत्येनभर्तुं । सद्योजातमुतजहात्येषः । उतोज
रंतनजहात्येकं२४ उतोबह्वनेकमहर्जहारा । अतंद्रोदेवःसदमेवप्रार्थं । यस्तद्वेदय
तआबभूव । संधांचयाꣳसंदधेब्रह्मणैषःरमतेतस्मिन्नुतजीर्णेशयाने । ननंजहा
त्यहँसुपूर्व्येषु । त्वामापोअनुसर्वाश्चरंतिजानतीः । वत्संपयसापुनानाःत्वमग्निꣳह
व्यवाहꣳसमिंत्से । त्वंभर्तामातरिश्वाप्रजानां २५ त्वंयज्ञस्त्वमुवेवासिसोमः । त-
वंदेवाहवमायंतिसर्वे । त्वमेकोसिबह्वननुप्राविष्टः । नमस्तेअस्तुसुहवोमएधि । न-
मोवामस्तुश्रुणुतꣳहवंमे । प्राणापानावजिरꣳसंचरंतौ । व्हयामिवांब्रह्मणातूर्तमे

तौ । योमांद्वेष्टितंजहितंयुवाना । प्राणापानौसंविदानौजहितं । अमुष्यासुनापासं-
गंसाथां २६ तंमेदेवाब्रह्मणासंविदानौ । वधायदत्तंतमहꣳहनामि । असज्जजान
सतआबभूव । यंयैजजानसउगोपोअस्य । यदाभारंतंद्रयतेसभर्तुं । परास्वभारंपु
नरस्तमेति । तद्वैतंप्राणोअभवः । महान्भोगःप्रजापतेः । भुजंःकरिष्यमाणःयद्दे-
वान्प्राणयोनवा २७ एकंप्रजानांगसाथांनवा १५ हरिꣳहरैतमनुयंतिदेवाः वि-
श्वस्येशानंवृषभंमतीनां । ब्रम्हसरूपमनुमेदमागात् । अयनंमाविदधीर्विक्रमस्व ।
माछिदोमृत्योमावधीः । मामेबलंविवृहोमाप्रमोषी । प्रजांमामैरीरिषअयुरुय । नू
चक्षसंत्वाहविषाविधेम । सद्यश्चकमानाय । प्रवेपानायमृत्यवै २८ प्रास्माआशा
अशृण्वन् । कामैनाजयन्पुनः । कामैनमेकामआगात् । हृदयाद्धृदयंमृत्योः । य
द्दमीषांमदःप्रियं । तदैतूपमामभिः । परैमृत्योअनुपरैहिपंथां । यस्तेश्वइतरोदेव
यानात् । चक्षुष्मतेशृण्वतेतैब्रवीमि । मानःप्रजाꣳरीरिषोमोतवीरान् । प्रपूर्व्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनसावंदमानः।नाधमानोवृषभंचर्षणीना।यःप्रजानामेकराएमानुषीणां।मृत्युं
यंजेप्रथमजामृतस्यं २९ मृत्यवेवीराश्चत्वारिंच १६ तरणिर्विश्वदर्शतोज्योति
ष्कृदसिसूर्य।विश्वमाभासिरोचनं।उपयामगृहीतोसिसूर्यायत्वा।भ्राजंस्वते
एषतेयोनिः।सूर्यावत्वाभ्राजंस्वते १७ आप्यायस्वमदितमसोमविश्वाभिरूति
भिः।भवानःसप्रथस्तमः १८ इयुष्टेयेपूर्वतरामपश्यन्व्युच्छंतिमुषसंमर्त्यासः।
अस्माभिरूनुप्रतिचक्ष्याभूदोतोयंतियेअपरीषुपश्यान् १९ ज्योतिष्मतींत्वासाद
यामिज्योतिःष्कृतंत्वासादयामिज्योतिर्विदंत्वासादयामिभास्वंतींत्वासादयामि
ज्वलंतींत्वासादयामिमम्लालाभवंतींत्वासादयामिदीप्यमानांत्वासादयामिरो-
चमानांत्वासादयाम्यजस्रात्वासादयामिबृहज्योतिषंत्वासादयामिबोधयंतींत्वा
सादयामिजाग्रंतींत्वासादयामि २० प्रयासायस्वाहा।यासायस्वाहा।वियासाय
स्वाहा।संयासायस्वाहोद्यासायस्वाहा।वयासायस्वाहा।शुचेस्वाहा।शोकाय

स्वाहा।तप्यस्त्वैस्वाहातपतेस्वाहा।[illegible]यायैस्वाहासर्वस्मैस्वाहा २१ चि-
त्तꣳसंतानेनभवंयवंन्नारुद्रंतेनिम्नापशूपतिꣳस्थूलहृदयेनाग्निꣳहृदयेनरुद्रंलोहि
तेनशर्वंमतस्नाभ्यामहादेवमंतःपार्श्वेनौषिष्ठहꣳशिंगिनिकोशाभ्यां २२ ज्योति
ष्मतींप्रयासायचित्तमेकं।चितिःपृथिव्यग्निः।सूर्यंतेचक्षुर्महाहंविहोतावघ्घोता
।ब्राम्हणएकंहोताग्निर्यजुभिः।सेनेंद्रस्यदेवस्य।सुवर्णंघर्मꣳसहस्रशीर्षाद्योभ
र्ताहंतरणिराप्यायस्वेयुष्ठेयेज्योतिष्मतीं।प्रयासायचित्तमेकंविꣳशतिः।चितिं
रग्निर्यजुभिरंतःप्रविष्टः।प्रजापतिर्भर्ताप्रजयासंविदानस्तस्यधीराज्योतिष्मतीं
त्रिपंचाशत २३ तच्छंयोरावृणीमहे।गातुंयज्ञाय।गातुंयज्ञपतये।दैवीस्वस्तिर-
स्तुनः।स्वस्तिर्मानुषेभ्यः।ऊर्ध्वंजिगातुभेषजं।शंनोअस्तुद्विपदे।शंचतुष्पदे
ॐ शांतिःशांतिःशांतिः।इतिउपनिषदादिचित्तिप्रथमसिद्धांतः।७।
अथसहवैकाठप्रारंभः।।श्रीगणेशायनमः।।हरिः ॐम्।नमोब्रह्मणेनमोअ-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्वग्नयेनमः पृथिव्यैनम ओषधीभ्यः । नमोवाचेनमोवाचस्पतयेनमोविष्णवेबृ-
हतेकरोमि । ॐ शांतिः शांतिः शांतिः । ॐ सहवैदेवानांचासुराणांचयज्ञौप्रततावा
स्तांवय * स्वर्गंलोकमेष्यामोवयमेष्यामइतितेसुराः सन्नह्यसहसैवाचरन्ब्रह्मह च-
यैणतपसैवदेवास्तेसुराअमुह्य * स्मैनप्रजान् * स्तेपराभवन्तेनस्वर्गन्लोकमाय
न्प्रसृतेनवैयज्ञेनदेवाः स्वर्गन्लोकमायन्नप्रसृतेनासुरान्पराभावयन्प्रसृतोहवैय-
ज्ञोपवीतिनोयज्ञोप्रसृतोनुपवीतिनोयत्किंचब्राह्मणोयज्ञोपवीत्यधीतेयजतएव-
तत्तस्माद्यज्ञोपवीत्यैवाधीयीतयाजयेद्यजेतवायज्ञस्यप्रसृत्याअजिनंवासोवाद-
क्षिणतउपवीयदक्षिणंबाहुमुद्धरतेवधत्तेसव्यमितियज्ञोपवीतमेतद्देवविपरीतं-
प्राचीनावीत * संवीतंमानुषं १ रक्षा * सिहवापुरोनुवाकेतपोग्रमतिष्ठंतताम्प्रज्ञा
पतिर्वरेणोपामैत्रयततानिवरंमवृणीतादित्योनोयोद्धाइतिताम्प्रजापतिरब्रवी- ९
द्योधयध्वंमितितस्मादुत्तिष्ठंत * हवातानिरक्षा * स्यादित्यंयोधयंतियावदस्तम

न्वंगात्तानिहवाएतानिरक्षा * सिगायत्रियाभिमंत्रितेनांभसाशाम्यंतितदुहवाए
तेब्रह्मवादिनःपूर्वाभिमुखाःसंध्यायांगायत्रियाभिमंत्रिताआपउर्ध्वाविक्षिपंति ।
एताआपोवज्रीभूत्वातानिरक्षा * सिमंदेहारुणेद्वीपेप्रक्षिपंतियत्प्रदक्षिणंप्रक्रम-
तितेनपाप्मानमवधून्वंत्युद्यंतमस्तंयंतमादित्यमभिध्यायन्कुर्वन्ब्राह्मणोविद्वा-
न्त्सकलंभद्रमश्नुतेसावादित्योब्रह्मेतिब्रह्मैवसन्ब्रह्माप्येतियएवंवेद २ यद्देवादे
वहेळनंदेवासश्चकृमावयं । आदित्यास्तस्मान्मामुंचतुर्त्तस्युर्त्तेनमामित । देवा
जीवनकाम्यायद्वाचानृतमूदिम । तस्मान्नइहमुंचतुविश्वेदेवाःसजोषसः । ऋ-
तेनद्यावापृथिवीऋतेनत्व * संरस्वति । कृतान्नःपाह्येनसोयत्किंचानृतमूदिम ।
इंद्राग्नीमित्रावरुणौसोमौधाताबृहस्पतिः । तेनोमुंचंत्वेनसोयदन्यकृतमारिम
सजातश्च * सादुतजामिश्च * साज्ज्यायसःश्च * सादुतवाकनीयसः । अनाधृष्टंदेवकृ
तंयदेनस्तस्मात्वमस्मांज्जातवेदोमुमुग्धि । यद्वाचायन्मनसाबाहुभ्यामूरुभ्याम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्ठीवभ्या*शिश्नैर्यदनृतंचकृमावयंअग्निर्मातस्मादेनसोगाहपत्यैःप्रमुंचतुचकृम
यानिदष्कृता येनत्रितोअर्णवांन्निर्बभूवयेनसूर्यंतमसोनिर्मुमोच येनेंद्रोविश्वाअ-
जहादरातीस्तेनाहंज्योतिषाज्योतिरानशानआक्षि । यत्कुसींदमप्रतीत्तंमयेहये
नंयमस्यनिधिनाचरामि । एतत्तदग्नेअनृणोभवामिजीवन्नेवप्रतितत्तेदधामि । य
न्मयिमातायदापिपेषयदंतरिक्षंयदाशसातिंक्रामामित्रितेदेवादिविजाताय दापं
इमंमेवरुणतत्वायामित्वन्नोअग्नेसत्वन्नोअग्नेत्वमग्नेअयासि ३ यददींव्यंनृणमहं
बभूवादित्मन्वासंजगरजनेभ्यः । अग्निर्मातस्मादिंद्रश्चसंविदानौप्रमुंचतां । यद्ध
स्ताभ्यांचकरकिल्बिषाण्यक्षाणांवग्नुमुपजिघ्रमानःउग्रंपश्याचराष्ट्रभृच्चतान्यप्स
रसावनुदत्तामृणानि । उग्रंपश्येराष्ट्रभृत्किल्बिषाणियदक्षवृत्तमनुदत्तमेतत् । नेन्न
ऋणानृणवइत्समानोयमस्यलोकेअधिरज्जुरायं । अवतेहेळउदुत्तमामिममेवरुण
तत्वायामित्वन्नोअग्नेसत्वन्नोअग्नेसंकुसुकोविकुसुकोनिर्ऋथोयश्चनिस्वनः । ते ये

स्मद्यक्ष्ममनांगसोदूरादूरमंचीचतं । निर्यक्ष्ममचीचतेकृत्यांनिर्ऋतिंच । तेनयो १
स्मत्समृंछातैतमंस्मैप्रसुवामसि । दुःश*सानुश*साभ्यांघृणेनानुघृणेनंच । तेना
न्यो १स्मत्समृंछातैतमंस्मैप्रसुवामासि । संवर्चसापयसासंतनूभिरगंन्महिमनसा
स*शिवेनं । त्वष्टानोअत्रविदधातुरायोनुर्मार्ष्टुतन्वो १यद्विलिष्टं ४ आयुष्टेविश्वतो
दधदयमग्निर्वरेण्यः । पुनस्तेप्राणआयातिपरायक्ष्म*सुवामिते । आयुर्दाअग्नेहवि
षोजुषाणोघृतप्रतीकोघृतयोनिरेधि । घृतंपीत्वामधुचारुगव्यंपितेवपुत्रमभिरक्ष
तादिमंडममग्नआयुषेवर्चसेकृधितिग्ममोजोवरुणस*शिशाधि । मातेवास्माअ-
दितेशर्मयछविश्वेदेवाजरद्दष्टिर्यथासत् । अग्नआयू*षिपवस*आसुवोर्जमिषंचनः
। आरेबाधस्वदुछुनां । अग्नेपवस्वस्वपाअस्मेवर्चःसुवीर्यं । दधद्रयिंमयिपोषं । अ
ग्निर्ऋषिःपवमानःपांचजन्यःपुरोहितः । तमीमहेमहागयं । अग्नेजातान्प्रणुदानः
सपत्नान्प्रत्यजातान्जातवेदोनुदस्व । अस्मेदीदिहिसुमनाअहेळंछमंतेस्यामत्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वरूथउद्भौ । सहसाजातान्प्रणुदानःसपत्नान्प्रत्यजातान्जातवेदोनुदस्व । अधि
नोब्रूहिसुमनस्यमानोवयꣳस्यामप्रणुदानःसपत्नान् । अग्नेयोनोभितोजनोदृक्षो-
वारोजिघाꣳसति । ता ꣳस्त्वंवृत्रहंजह्यवस्वस्वभ्यमाभर । अग्नेयोनोभिदासति
समानोयश्चनिष्ट्यः । तंवयꣳसमिधंकृत्वातुभ्यमग्नेपिदध्मसि । योनःशपादशपतो
यश्चनःशपतःशपात् । उषाश्चतस्मैनिमृक्षꣳसर्वंपापꣳसमूहतां । योनःसपत्नोयोर-
णोमर्तोभिदासतिदेवाः । इध्मस्यैवप्रक्षायतोमातस्योच्छेषिकिंचन । योमाद्वेष्टिजा
तवेदोयंचाहंद्वेष्मियश्चमां । सर्वाꣳस्तानग्नेसंदहयाꣳश्चाहंद्वेष्मियेचमां । योअस्म
भ्यमरातीयाद्यश्चनोद्वेषतेजनः । निंदाद्योअस्मांदिप्साच्चसर्वाꣳस्तान्मष्मषाकुरु
सꣳशितंमेब्रह्मसꣳशितंवीर्यंꣳआबलेसꣳशितंक्षत्रंमेजिष्णुयस्याहमस्मिपुरोहितः । उदेषांबाहूअतिरमुद्वर्चोअथोबलं । क्षिणोमिब्रह्मणामित्रानुन्नयामिस्वांꣳअहं
।पुनर्मनःपुनरायुर्मआगात्पुनःश्चक्षुःपुनःश्रोत्रंमआगात्पुनःप्राणःपुनराकूतंमआ

गात्पुनश्चित्तंपुनराधीतंमआगात् । वैश्वानरोमेदंध्वस्तनूपाअवबाधतांदुरितानि
विश्वा ५ वैश्वानरायप्रतिवेदयामोयदीनृणꣳसंगरोदेवतासु । सएतान्पाशान्प्रमु
चन्प्रवेदसनोमुंचातुदुरितादवद्यात् । वैश्वानरःपवयान्नःपवित्रैर्यत्संगरमभिधा-
वाम्याशां । अनाजानन्मनसायाचमानोयदत्रैनोअवतत्सुवामि । अमीयेसुभगेदि
विविचृतौनामतारके । प्रेहामृतस्यछतामेतद्बंधकमोचनं । विजिहीर्ष्वलोकान्कृधि
बंधान्मुंचास्मिबद्धकं । योनैरिवप्रच्युतोगर्भसर्वान्पथोअनुष्व । सप्रजानन्प्रतिगृ-
भ्णीताविद्वान्प्रजापतिःप्रथमजाऋतस्य । अस्माभिर्दत्तंजरसःपरस्तादछिन्नंततंतु
मनुसंचरेम । ततंतंतुमन्वेकेअनुसंचरंतिषोदत्तंपित्र्यमाजनवत् । अबंध्वेकेददतः
प्रयछाद्दातुंचेच्छक्नवाꣳसःस्वर्गएषां । आरंभेथामनुसꣳरभेथाꣳसमानंपंथामवथो
घृतेन । यद्वोपूर्त्तंपरिविष्टंयदग्नौतस्मैगोत्रायेहजायापतीसꣳरभेथां । यदंतरिक्षंपृ
थिवीमुतद्यांयन्मातरंपितरंवाजिहिꣳसिम । अग्निर्मातस्मादेनसोगार्हपत्युंन्नोनेने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षहुरितायानिंचकृम।भूमिर्मातादितिर्नोजनित्रंभ्रातांतरिक्षमभिशस्तएनःद्यौर्नः
पितापितृयात्छंभवासिज्रामिमित्वामाविंविक्तिसलोकात्। यंत्रसुहार्दैःसुकृतोमदंतेविहायरोगंतन्वा ३ स्वायाँअश्लोणाँगैरन्हुताःस्वर्गेतत्रपश्येमपितरंचपुत्रं। यदन्नमद्यनृतेनदेवादास्यंन्नदास्यन्नुतवाकरिष्यन्। यद्देवानांचक्षुष्यागोअस्तियदेवकिंचंप्रतिजग्राहमग्निर्मातस्मादनृणंकृणोतुयदन्नमद्मिबहुधाविरूपंवासोहिरण्यँमृतगामजामविं। यद्देवानांचक्षुष्यागोअस्तियदेवकिंचंप्रतिजग्राहमग्निर्मातस्मादनृणंकृणोतु। यन्मयामनसावाचाकृतमेनःकदाचन। सर्वस्मात्तस्मान्मेळितोमोग्धित्व हिवेत्थंयथातथं ६ वातरशनाहवाऋषयःश्रमणार्उर्ध्वमँथिनोबभूवुस्तानृषयोर्थमाय स्तेनिलायंमचर स्तेनुप्रविशुःकुश्मांडानिता स्तेष्वन्वविंदन्छ्रद्धयाचतपसाचतानृषयोब्रुवन्कथानिलायँचरथेतितऋषीनब्रूवन्नमोवोस्तुभगवंतोस्मिधाग्निकेनवःसपर्यामेतिनानृषयोब्रुवन्पवित्रन्नोब्रूतयेनारपसस्यामेतित-

एतानिसूक्तान्यंपश्यन्यद्देवादेवहेळनंयददींव्यंनृणमहंबभूवायुष्टेविश्वतोदधदित्येतैराज्यँजुहुतवैश्वानरायप्रतिवेदयामइत्युपतिष्ठतयदर्वाचीनमेनोभ्रूणहत्यास्तस्मान्मोक्ष्यध्वइतितएतैरजुहवुस्तेरेपसोभवन्कर्मादिष्वेतैर्जुहुयात्पूतोदेवलोकान्त्समश्नुते ७ कूश्मांडैर्जुहुयाद्योपूतइक्मन्यैतयथास्तेनोयथाभ्रूणहैवमेषभवतियोयोनौरेतःसिंचतियदर्वाचीनमेनोभ्रूणहत्यायास्तस्मान्मुच्यतेयाबदेनौदीक्षामुपैतिदीक्षितएतैःसंततिजुहोतिसंवत्सरंदीक्षितोभवतिसंवत्सरादेवात्मानंपुनीतेमासंदीक्षितोभवतियोमासः ससंवत्सरःसंवत्सरादेवात्मानंपुनीतेचतुर्वि शतिरात्रींदीक्षितोभवतिचतुर्वि शतिरर्धमासाः संवत्सरःसंवत्सरादेवात्मानंपुनीतेद्वादशरात्रींदीक्षितोभवतिद्वादशमासाःसंवत्सरःसंवत्सरादेवात्मानंपुनीतेषड्रात्रींदीक्षितोभवतिषड्वाऋतवःसंवत्सरःसंवत्सरादेवात्मानंपुनीतेतिस्रोरात्रींदीक्षितोभवतित्रिपदागायत्रीगायत्रियाएवात्मानंपुनीतेनमा समश्नी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यान्नास्त्रियमुपेयान्नोपर्यासीतजुगुप्सेतानृतात्पयोब्राह्मणस्यव्रतंयवागूराजन्य-- स्यामिक्षावैश्यस्याथोसौम्येप्यध्वरएतद्व्रतंब्रूयाद्यदिमन्यैतोपदास्यामीत्योदनं धानाःसक्तून्घृतमित्यनुव्रतयेदात्मनोनुपदासाय ८ अजान्ह्वैपश्नी*स्तपस्यमा नान्ब्रह्मस्वयंभ्वभ्यानर्षत्तऋमयोभवन्तद्दर्षीणामृषित्वंतांदेवतामुपातिष्ठंतयज्ञ- कामास्तएतंब्रह्मयज्ञमपश्यन्तमाहरंतेनायजंतयद्दचोध्यगीषतताः पयआहुत-- योदेवानामभवन्यद्यजू*षिघृताहुतयोयत्सामानिसोमाहुतयोयदथर्वांगिरसोम ध्वाहुतयोयब्राह्मणानीतिहासान्पुराणानिकल्पान्गाथानाराश*सीमेंदाहुतयोदे वानामभवन्ताभिःक्षुधैपाप्मानमापाघ्नन्नपहतपाप्मानोदेवाः स्वर्गंलोकमाय-- न्ब्रह्मणःसायुज्यमृषयोगछन् ९ पंचवाएतेमहायज्ञाःसंततिप्रतायंतेसततिसंतिं ष्ठंतेदेवयज्ञःपितृयज्ञोभूतयज्ञोमनुष्ययज्ञोब्रह्मयज्ञइतियदग्नौजुहोत्यपिसमिधं तद्देवयज्ञःसंतिष्ठतेयत्पितृभ्यःस्वधाकरोत्यप्युपस्ततपितृयज्ञःसंतिष्ठतेयद्भूते--

भ्योबलि*हरंतितद्भूतयज्ञःसंतिष्ठतेयब्राह्मणेभ्योन्नंददातितन्मनुष्ययज्ञःसंतिष्ठ तेयत्स्वाध्यायमधीयीतैकामप्यृचंयजुःसामवातद्ब्रह्मयज्ञःसंतिष्ठतेयद्दचौधींतेप- यंसःकुल्याअस्यपितॄन्त्स्वधाअभिवहंतियद्यजू*षिघृतस्यकूल्यायत्सामानिसो- मंएभ्यःपवतेयदथर्वांगिरसोमधोः कूल्यायब्राह्मणानीतिहासान्पुराणानिकल्पा न्गाथानाराश*सीमेंदंसकूल्याअस्यपितॄन्त्स्वधाअभिवहंतियदृचोधींतेपयंआ- हुतिभिरेवतद्देवा*स्तर्पयंतियद्यजु*षिघृताहुतिभिर्यत्सामानिसोमाहुतिभिर्यद- थर्वांगिरसोमध्वाहुतिभिर्यब्राह्मणानीतिहासान्पुराणानिकल्पान्गाथानाराश* सीमेंदाहुतिभिरेवतद्देवा*स्तर्पयतितएनंतृप्ताआयुषातेजसावर्चसाश्रियायश-- साब्रह्मवर्चसेनान्नाद्येनचतर्पयंति १० ब्रह्मयज्ञेनयक्ष्यमाणःप्राच्यांदिशिग्रामा दछंदिर्दर्शउदीच्यांप्रागुदीच्यांवोदितंआदित्येदक्षिणतउपवीयोपविश्यहस्तांब वनिज्यत्रिराचामेद्विःपरिमृज्यसकृदुपस्पृश्यशिरश्चक्षुषीनासिकेश्रोत्रेहृदयमाल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्यायत्रिराचामतितेनऋचःप्रीणातियद्विःपरिमृजतितेनयजुꣳषियत्सकृदुपस्पृ-
शतितेनसामानियत्सव्यंपाणिंपादौप्रोक्षतियच्छिरश्चक्षुषीनासिकेश्रोत्रेहृदयमा
लभतेतेनाथर्वांगिरसोब्राह्मणानीतिहासान्पुराणानिकल्पान्गाथानाराशꣳसी-
प्रीणातिदर्भाणांमहदुपस्तीर्योपस्थंकृत्वाप्राङासीनःस्वाध्यायमधीयीतापांवाए-
षओषधीनाꣳरसोयद्दर्भाःसरसमेवब्रह्मवकुरुतेदक्षिणोत्तरौपाणीपादौकृत्वासपवि
त्रावोमितिप्रतिपद्यतएतद्वैयजुस्त्रयींविद्यांप्रत्येषावागेतत्परममक्षरंतदृतेदृचाभ्युं
क्तमृचोअक्षरैःपरमेव्योमन्यस्मिंदेवाअधिविश्वेनिषेदुर्यस्तन्नवेदकिमृचाकरिष्य-
तियइत्तद्विदुस्तइमेसमासतइतित्रीनेवप्रायुंक्तभूर्भुवःस्वरित्याहैतद्वैवाचःसत्यंय
देववाचःसत्यंत्तत्प्रायुंक्ताथसावित्रींगायत्रींत्रिरन्वाहपच्छौर्धचैशोनवाꣳसंविता
श्रियंःप्रसवितारंश्रियमेवाप्नोत्यथोप्रज्ञातयैवप्रतिपदाछंदाꣳसिप्रतिपद्यते ११ या
मेमनसास्वाध्यायमधीयीतदिवानक्तंवेतिहस्माहशौचआन्ध्रेयउतारण्येबलंउता

वाचोतातिष्ठन्नुतव्रजन्नुतासीनउतशयानोधीयीतैवस्वाध्यायंतपस्वीपुण्योभवति
यएवंविद्वान्स्वाध्यायमधीतेनमोब्रह्मणेनमोअस्त्वग्नयेनमःपृथिव्यैनमओषधी
भ्यः। नमोवाचेनमोवाचस्पतयेनमोविष्णवेबृहतेकरोमि १२ मध्यंदिनेप्रबल-
मधीयीतासौखलुवाएषआदित्योयद्ब्राह्मणस्तस्मात्तर्हितेक्षिणष्ठतपतितदेषा-
भ्युक्तावित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेःआप्राद्यावापृथिवीअं
तरिक्षꣳसूर्यआत्माजगतस्तस्थुषश्चेतिसवाएषयज्ञःसद्यःप्रतायतेसंद्यसंतिष्ठते
तस्यप्राक्सायमवभृथोनमोब्रह्मणइतिपरिधानीयांत्रिरन्वाहापउपस्पृश्यगृहानै
तितोयत्किंचददातिसादक्षिणा १३ तस्यवाएतस्ययज्ञस्यमेधोहाविर्धानंवि-
द्युदग्निर्वर्षꣳहविस्तंयत्स्तनयित्नुर्वैषट्कारोयदवस्फूर्जतिसोनुवषट्कारोवायुरात्मामावा-
स्याःस्विष्टकृद्यएवंविद्वान्मेघेवर्षतिविद्योतमानेस्तनयत्यवस्फुर्जतिपवमानेवा-
यावमावास्यायाꣳस्वाध्यायमधीतेतपएवतत्तप्यतेतपोहिस्वाध्यायइत्युत्तमन्नाक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

*रोहत्युत्तमःसमानानांभवतियावैंत*हवाइमांवित्तस्यपूर्णांददत्स्वर्गंलोकंजयति तावैंतंलोकंजयतिभूया *संचाश्नय्यंचापपुनर्मृत्युंजयतिब्रह्मणःसायुज्यंगच्छति १४ तस्यवाएतस्ययज्ञस्यह्रावंनध्यायोयदात्माशुचिर्यद्देशःसमृद्धिर्देवतानियएवंविद्वान्महारात्रउषस्युदितेव्रज*स्तिष्ठन्नासींनःशयानोरण्यैग्रामेवायावत्तरस* स्वाध्यायमधीतेसर्वांल्लोकांजयतिसर्वान्लोकाननृणोनुसंचरतितदेषाभ्युक्ता। अनृणाअस्मिन्ननृणाःपरस्मि*न्स्तृतीयेलोकेअनृणास्याम। येदेवयानाउतपितृयाणाःसर्वांपथोअनृणाआक्षीयमेत्यग्निंवैजातंपाप्माजग्राहतंदेवाआहुतीभिपाप्मानमपाघ्नन्नाहुतीनांयज्ञेनयज्ञस्यदक्षिणाभिर्दक्षिणानांब्राम्हणेनब्राम्हणस्यछंदोभिःछंदसा*स्वाध्यायेनापहतपाप्मास्वाध्यायोदेवपवित्रंवाएतत्तंयोनूत्सृजत्यभागोवाचिभवत्यभागोनाकेतदेषाभ्युक्ताायस्तित्याजसखिविद्*सखायन्नतस्यवाच्यपिभागोअस्ति। यदी*श्रृणोत्यलक*श्रृणोतिनहिप्रवेदसुकृतस्यपंथा

मितितस्मात्स्वाध्यायोध्येतव्योयंयंक्रतुमधीतेतेनतनास्येष्टभवत्येन्द्रवायोरादि-त्यस्यसायुज्यंगच्छतितदेषाभ्युक्ता। येअर्वाङ्तवापुराणेवेदंविद्वा*संमभितो-वदंत्यादित्यमेवतेपरिवदंतिसर्वेंअग्निंद्वितीयंतृतीयंचबह्*समितियावंतीवैंदेवतास्ताः सर्वांवेदविदिब्राम्हणेवसंतितस्माब्राम्हणेभ्योवेदविद्भ्योदिवेदिवेनमस्कुर्यान्ना*ल्लीलंकीर्तयेदेताएवदेवताःप्रीणाति १५ रिच्यतइववाएषप्रेवरिच्यतेयोयाजयतिप्रतिवागृण्हातियाजयित्वाप्रतिगृह्यवानश्नंत्रिःस्वाध्यायंवेदमधीयीतविरात्रंवासावित्रींगायत्रीमन्वातिरेचयतिवरोदक्षिणावरेणैववर*स्पृणोत्यात्माहिवरः १६ दुहेहवाएषछंदा*मियोयाजयतिसयेनंयज्ञक्रतुनायाजयेसोरण्यंपरेत्यशुचौदेशेस्वाध्यायमेवैनमधीयन्नासीततस्यानशनंदीक्षास्छानमुपसदआसन*सुत्यावाग्जुहुर्मनउपभृद्धृतिर्ध्रुवाप्राणोहविः सामाध्वर्युःसवाएषयज्ञःप्राणदक्षिणोनैतदक्षिणःसमृद्धतरः १७ कतिधावकीर्णिप्रविशतिचतुर्द्वेत्याहुर्ब्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्मवादिनौमरुतःप्राणैरिंद्रंबलैनबृहस्पतिंब्रह्मवर्चसेनाग्निमेवैतैरेणसवैणतस्यै--
तांप्रायश्चित्तिंविदांचकारसुदेवः काश्यपोयोब्रह्मचायंवकिरेदमावास्यायाश्रा--
व्यांमग्निंप्रणीयोपसमाधायद्विराज्यस्योपघातंजुहोतिकामावंकीर्णोस्म्यवंकीर्णो
स्मिकामकामायस्वाहाकामाभिद्रुग्धोस्म्यभिद्रुग्धोस्मिकामकामायस्वाहेत्यमृ-
तंवाआज्यंमृतमेवात्मंधत्तेहुत्वाप्रयंतांजलिःकवातिर्यङ्डग्निमभिमंत्रयेतसंमा
सिंचतुमरुतःसमिंद्रसंबृहस्पतिःसंमायमग्निसिंचत्वायूषाचबलेनचायुष्मंतंकरो
तमेतिप्रतिहास्मैमरुतः प्राणांदधतिप्रतींद्रोबलंप्रतिबृहस्पतिर्ब्रह्मवर्चसंप्रत्य--
ग्यिरितरत्सर्व॑सर्वंतनुर्भूत्वासर्वमायूरेतित्रिरभिमंत्रयेतद्विषत्याहिदेवायोपूतइ
वमन्यैतसइत्थंजुहुयदित्थमभिमंत्रयेतपुनीतएवात्मानमायुरेवात्मंधत्तेवरोदाक्षि
णावरेणैवर॑स्पृणोत्यात्माहिवरः १८ भूःप्रपद्येभुवः प्रपद्येस्वः प्रपद्येभूर्भुवस्वः १६
प्रपद्येब्रम्हप्रपद्येब्रह्मकोशंप्रपद्येमृतंप्रपद्येमृतकोशंप्रपद्येचतुर्जालंब्रह्मकोशंयं-

मृत्युर्नावपश्यतितंप्रपद्येदेवान्प्रपद्येदेवपुरंप्रपद्येपरीवृतोवरीवृतोब्रह्मणावर्मणा
हंतेजसाकश्यपस्ययस्मैनमस्तस्छिरोधर्मोमूर्धानंब्रम्होत्तराहनुर्यज्ञोधराविष्णुह
दय॑संवत्सरःप्रजननमश्विनौपूर्वपादावत्रिर्मध्यंमित्रावरुणावपरपादावग्निःपुछं
स्यप्रथमंकांडंततइंद्रस्ततःप्रजापतिरभयंचतुर्थ॑सवाएषदिव्यःशाकरःशिशु-
मार॒ः स्त॑ह्यएवंवेदापपुनर्मृत्युंजयतिजयतिस्वर्गंलोकंनाध्वनिप्रमीयतेनाग्नौ-
प्रमीयतेनाप्सुप्रमीयतेनानपत्यःप्रमीयतेलग्ध्वान्नोभवतिध्रुवस्त्वमसिध्रुवस्य--
क्षितमसित्वंभूतानामधिपतिरसित्वंभूतानाश्रेष्ठोसित्वांभूतान्युपपर्यावर्तंतेनमं
स्तेनमःसर्वंतेनमोनमःशिशुकुमारायनमः १९ नमःप्राच्यैदिशेयाश्चदेवतांएत
स्यांप्रतिवसंत्येताभ्यश्चनमोनमोदक्षिणायैदिशेयाश्चदेवतांएतस्यांप्रतिवसंत्ये
ताभ्यश्चनमोनमःप्रतीच्यैदिशेयाश्चदेवतांएतस्यांप्रतिवसंत्येताभ्यश्चनमोनम
उदीच्यैदिशेयाश्चदेवतांएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमऊर्ध्वायैदिशेयाश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवतांएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमोधरायैदिशेयाश्चदेवतांएतस्यांप्रतिवसंत्येताभ्यश्चनमोनगौवांतरायैदिशेयाश्चदेवतांएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमोगंगायमुनयोर्मध्येयैवसंतितेमेप्रसन्नात्मानश्चिरंजीवितंवर्द्धयंतिनमोगं--गायमुनयोर्मुनिभ्यश्चनमोनमोगंगायमुनयोर्मुनिभ्यश्चनमः। सहरक्षा * सियद्वै-वाःसप्तदशयददीव्यंपंचदशायुष्टेचतुस्त्रि *शद्वैश्वानरायषड्वि * शतिर्वातंरशनाहकुश्मांडैरजान्हपंचब्रह्मयज्ञेनग्रामेमध्यंदिनेतस्यवैमेघस्तस्यवैद्यौरिच्यंतेदुहेहंकतिधावंकीर्णीभूनमःप्राच्यैयि *शतिःसहंब्रम्हयज्ञेनवि * शतिः २० नमोब्रम्हणेनमोअस्त्वग्नयेनमःपृथिव्यैनमओषधीभ्यः। नमोवाचेनमोवाचस्पतयेनमोविष्णवेबृहतेकरोमि। ॐ शांतिः शांतिः शांतिः ।। इतिसहवैउपनिषदसंपूर्ण० ॥

। अथशिक्षोपनिषत्। श्रीगणेशा०। शन्नोमित्रशंवरुणः। शन्नोभवत्वर्यमा। शन्नइंद्रोबृहस्पतिः। शन्नोविष्णुरुरुक्रमः। नमोब्रह्मणे। नमस्तेवायो। त्वमेवप्रत्यक्षंब्रह्मा

सि। त्वमेवप्रत्यक्षंब्रह्मवदिष्यामि। ऋतंवदिष्यामि। सत्यंवदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतुमां। अवतुवक्तारं। ॐ शांतिः शांतिः शांतिः। ॐ शीक्षांव्याख्यास्यामः। वर्णस्वरः। मात्राबलं। सामसंतानः। इत्युक्तःशीक्षाध्यायः १शीक्षांपंचा १सहनौयशः। सहनौब्रह्मवर्चसं। अथातःस *हितायाउपनिषदंव्याख्यास्यामः। पंचस्वधिकरणेषु। अधिलोकमधिज्यौतिषमधिविद्यमधिप्रजंमध्यात्मं। तामहास *हिताइत्याचक्षते। अथाधिलोकं। पृथिवीपूर्वरूपं। द्यौरुत्तररूपं। आकाशःसंधिः १ वायुःसंधानं। इत्यधिलोकं। अथाधिज्यौतिषं। अग्निःपूर्वरूपं। आदित्यउत्तररूपं। आपःसंधिः। वैद्युतःसंधानं। इत्यधिज्यौतिषं। अथाधिविद्यं। आचार्यःपूर्वरूपं २ अंतेवास्युत्तररूपं। विद्यासंधिः। प्रवचन *संधानं। इत्यधिविद्यं। अथाधिप्रजं। मातापूर्वरूपं। पितोत्तररूपं। प्रजासंधिः। प्रजन *संधानं। इत्यधिप्रजं ३ अथाध्यात्मं। अधराहनुः। पूर्वरूपं। उत्तराहनुरुत्तररूपं। वाक्संधिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

। जिव्हासंधानं । इत्यध्यात्मं । इतिमामंहास॑हिताः । यएवमेतामहास॑हिताव्या
ख्याताव॒दः । संधीयतेप्रजयापशुभिः । ब्रह्मवर्चसेनान्नाद्येनसुवर्ग्येणलोकेन ४सं
धिराचार्यःपूर्वरूपमित्यधिप्रजंलोकेन २ यश्छंदसामृषभोविश्वरूपः । छंदोभ्यो
ध्यमृतात्संबभूव । समेद्रोमेधयास्पृणोतु । अमृतस्यदेवधारणोभूयासं । शरीरंमे
विचर्षणं । जिव्हामधुमत्तमा।कर्णाभ्यांभूरीविश्रुवं । ब्रह्मणःकोशोसि । मेधयापिहि
तः । श्रुतंमेगोपाय । आवहंतीवितन्वाना १ कुर्वाणाचीरमात्मनः । वासा॑सिमम
गावश्च । अन्नपानेचसर्वदा । ततोमेश्रियमावह । लोमशांपशुभिःसहस्वाहा । आ
मायंतुब्रह्मचारिणःस्वाहा । विमायंतुब्रह्मचारिणःस्वाहा । प्रमायंतुब्रह्मचारिणः
स्वाहा । दमायंतुब्रह्मचारिणःस्वाहा । शमायंतुब्रह्मचारिणःस्वाहा २ यशोजनै
सानिःस्वाहा । श्रेयान्वस्यसोसानिस्वाहा । तंत्वाभगप्रविशानिःस्वाहा । समाभग
प्रविशस्वाहा । तस्मिनत्सहस्रशाखे । निभगाहंत्वयिमृजेस्वाहा । यथापःप्रवता-

यंति । यथामासाअहर्जरं । एवंमांब्रह्मचारिणः । धातरायंतुसर्वतःस्वाहा । प्रतिवे
शोसिप्रमाभाहिप्रमापद्यस्व ३ वितन्वानाशमायंतुब्रह्मचारिणःस्वाहाधातरा-
यंतुसर्वतःस्वाहैकंच ३ भूर्भुवसुवरितिवाएतास्तिस्रोव्याहृतयः । तासामुहस्मै-
तांचतुर्थीं । माहाचमस्यःप्रवेदयतेमहइति । तत्ब्रह्म । सआत्मा । अंगान्यन्या
देवताः । भूरितिवाअयंलोकः । भुवःइत्यंतरिक्षं । सुवरित्यसौलोकः १ महइत्यादि
त्यः । आदित्येनवासर्वेलोकामहीयंते । भूरितिवाअग्निः । भुवइतिवायुः । सुवरि
त्यादित्यः । महइतिचंद्रमाः । चंद्रमसावावसर्वेणिज्योतींषिमहीयंते । भूरिति
वाऋचः । भुवइतिसामानि । सुवरितियजूंषि २ महइतिब्रह्म । ब्रह्मणावावस-
र्वेवेदामहीयंते । भूरितिवैप्राणः । भुवइत्यपानः । सुवरितिव्यानः । महइत्यन्नं । अ
न्नेनवावसर्वेप्राणामहीयंते । तावाएताश्चतस्रश्चतुर्धा । चतस्रश्चतस्रोव्याहृतयः
। तायोवेद । सवेदब्रह्म । सर्वस्मैदेवाबलिमावहंति ३ असौलोकोयजूंषिवेदद्वे-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चं ४ सयएषोंतरहृदयआकाशः। तस्मिन्नयंपुरुषोमनोमयः। अमृतोहिरण्मयः। अंतरेणतालुके। यएषस्तनइवावलंबते। सेंद्रयोनिः। यत्रासौकेशांतोविवर्तते। व्यपोह्यशीर्षकपाले। भूरित्यग्नौप्रतितिष्ठति। भुवइतिवायौ १ सुवरित्यादित्ये। महइतिब्रह्मणि। आप्नोतिःस्वाराप्तं। आप्नोतिमनसःस्पतिं। वाक्पतिश्चक्षुष्पतिः। श्रोत्रंपतिर्विज्ञानंपतिः। एतत्ततोभवति। आकाशशरीरंब्रह्म। सत्यात्मंप्राणारामंमनआनंदं। शांतिसमृद्धममृतं। इतिप्राचीनयोग्योपास्वा २ वायावमृतमेकंच ५ पृथिव्यंतरीक्षंद्यौर्दिशोवांतरदिशाः। अग्निर्वायुरादित्यश्चंद्रमानक्षत्राणि। आपओषधयोवनस्पतयआकाशआत्मा। इत्यधिभूतं। अथाध्यात्मं। प्राणोव्यानोपानउदानःसमानः। चक्षुश्श्रोत्रंमनोवाक्त्वक्। चर्ममा*स**स्नावास्थिमज्जा। एतदधिविधायऋषिरवोचत्। पांक्तंवाइद*सर्वं। पांक्तेनैवपाङ्क*स्पृणोतीतिं १ सर्वमेकंच ६ ॐ मितिब्रह्म। ॐ मितीद*सर्वं। ओमित्येतदनुकृतिहस्मवाअप्योश्रावयेत्याश्रावयंति। ॐ मितिसामानिगायंति। ॐ *शोमितिशस्त्राणिश*संतिं। ॐ मित्यध्वर्युःप्रतिगरंप्रतिगृण्हाति। ॐ मितिब्रह्माप्रसौति। ॐ मित्यग्निहोत्रमनुजानाति ॐ मितिब्राह्मणःप्रवक्ष्यन्नाहब्रह्मोप्नवानीतिं। ब्रह्मैवोप्नोति १ ॐ दश ७ ऋतंचस्वाध्यायप्रवचनेच। सत्यंचस्वाध्यायप्रवचनेच। तपश्चस्वाध्यायप्रवचनेच। दमश्चस्वाध्यायप्रवचनेच। शमश्चस्वाध्यायप्रवचनेच। अग्नयश्चस्वाध्यायप्रवचनेच। अग्निहोत्रंचस्वाध्यायप्रवचनेच। अतिथयश्चस्वाध्यायप्रवचनेच। मानुषंचस्वाध्यायप्रवचनेच। प्रजाचस्वाध्यायप्रवचनेच। प्रजनश्चस्वाध्यायप्रवचनेच। प्रजातिश्चस्वाध्यायप्रवचनेच। सत्यमितिसत्यवचाराथीतरः। तपइतितपोनित्यःपौरुशिष्टिः। स्वाध्यायप्रवचनेएवेतिनाकौमौद्गल्य। तद्धितपस्तद्धितपः १ प्रजाचस्वाध्यायप्रवचनेचषट्चं १० अहंवृक्षस्यरेरिव। कीर्तिःपृष्ठंगिरेरिव। ऊर्ध्वपवित्रोवाजिनीवस्वमृतमस्मि।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रविणꣳ* सवर्चसं । सुमेधाअमृतोक्षितः । इतित्रिशंकोर्वेदानुवचनं १ अहꣳ*षट् । वेदमनूच्याचार्योंतेवासिनमनुशास्ति । सत्यंवद । धर्मंचर । स्वाध्यायान्माप्रमद । आचार्यायप्रियंधनमाहृत्यप्रजातंतुमाव्यवच्छेत्सीः । सत्यान्नप्रमदितव्यं।धर्मान्नप्रमदितव्यं । कुशलान्नप्रमदितव्यं।भूत्यैनप्रमदितव्यं । स्वाध्यायप्रवचनाभ्यान्नप्रमदितव्यं १ देवपितृकार्याभ्यांनप्रमदितव्यं । मातृदेवोभव । पितृदेवोभव । आचार्यदेवोभव । अतिथिदेवोभव । यान्यनवद्यानिकर्माणि । तानिसेवितव्यानि-नोइतराणि । यान्यस्माकꣳसुचरितानि । तानित्वयोपास्यानि २ नोइतराणि।येके चास्मच्छ्रेयाꣳसोब्राह्मणाः । तेषांत्वयासनेनप्रश्वसितव्यं । श्रद्धयादेयं । अश्रद्धयादेयंश्रियादेयं।ह्रियादेयं । भियादेयं । संविदादेयं । अथयदितेकर्मविचिकित्सा वावृत्तविचिकित्सावास्यात् ३ येतत्रब्राह्मणाःसंमर्शिनःयुक्ताआयुक्तः । अलूक्षाधर्मकामाःस्युः । यथातेतत्रवर्तेरन् । तथातत्रवर्तेथाः । अथाभ्याख्यातेषु । येतत्र

ब्राह्मणाःसंमर्शिनः । युक्ताआयुक्ताः । अलूक्षाधर्मकामास्युः । यथातेतेषुवर्तेरन् । तथातेषुवर्तेथाः । एषआदेशः । एषउपदेशः । एषावेदोपनिषत् । एतदनुशासनं-एवमुपासितव्यं । एवमुचैतदुपास्यं ४ स्वाध्यायप्रवचनाभ्यान्नप्रमदितव्यंतानि त्वयोपास्यानिस्यात्तेषुवर्तेरन्सप्तच १० शन्नोमित्रःशंवरुणः । शन्नोभवत्वर्यमा । शन्नइंद्रोबृहस्पतिः । शन्नोविष्णुरुरुक्रमः । नमोब्रह्मणे । नमस्तेवायो । त्वमेवप्रत्यक्षंब्रह्मासि । त्वामेवप्रत्यक्षंब्रह्मावादिषं । ऋतमवादिषं । सत्यमवादिषं । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्मां । आवीद्वक्तारं । ॐ शांतिःशांतिःशांतिः । ७ । । अथब्रह्मविद्योपनिषत्प्रारंभ । श्रीगणेशायनमः । हरिः ॐ । सहनाववतु । सह-नौभुनक्तु । सहवीर्यंकरवावहै । तेजस्विनावधीतमस्तुमाविद्विषावहै । ॐ शांतिः शांतिःशांतिः । हरिॐब्रम्हविदाप्नोतिपरं । तदेषाभ्युक्ता । सत्यंज्ञानमनंतंब्रह्म । योवेदनिहितंगुहायांपरमेव्योमन्न । सोश्नुतेसर्वान्कामान्त्सह । ब्रह्मणाविपश्चि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेति । तस्माद्वाएतस्मादात्मनआकाशः संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यःपृथिवी । पृथिव्याओषधयः । ओषधीभ्योन्नं । अन्नात्पुरुषः । सवाएषपुरुषोन्नरसमयः । तस्येदमेवशिरः । अयंदक्षिणःपक्षः । अयमुत्तरःपक्षः । अयमात्मा । इदंपुच्छंप्रतिष्ठा । तदप्येषश्लोकोभवति १ अन्नाद्वैप्रजाःप्रजायंते । याः काश्चपृथिवीश्रिताः । अथोअन्नेनैवजीवंति । अथैनदपियंत्यंततः । अन्नंहिभूतानांज्येष्ठं । तस्मात्सर्वौषधमुच्यते । सर्वेवैतेन्नमाप्नुवंति । येन्नंब्रह्मोपासते । अन्नंहिभूतानांज्येष्ठं । तस्मात्सर्वौषधमुच्यते । अन्नाद्भूतानिजायंते । जातान्यन्नेन वर्द्धंते । अद्यतेतिचभूतानि । तस्मादन्नंतदुच्यतइति । तस्माद्वाएतस्मादन्नरसमयात् । अन्योंतरआत्माप्राणमयः । तेनैषपूर्णः । सवाएषपुरुषविधएव । तस्यपुरुषविधतां । अन्वयंपुरुषविधः । तस्यप्राणएवशिरः । व्यानोदक्षिणःपक्षः । अपान उत्तरःपक्षः । आकाशआत्मा । पृथिवीपुच्छंप्रतिष्ठा । तदप्येषश्लोकोभवति २ प्रा-

णंदेवाअनुप्राणंति । मनुष्याःपशवश्चये । प्राणोहिभूतानामायुः । तस्मात्सर्वायुषमुच्यते । सर्वमेवतआयुर्यंति । येप्राणंब्रह्मोपासते । प्राणोहिभूतानामायुः । तस्मात्सर्वायुषमुच्यतइति । तस्यैषएवशारीरआत्मा । यःपूर्वस्य । तस्माद्वाएतस्मात्प्राणमयात् । अन्योंतरआत्मामनोमयः । तेनैषपूर्णः । सवाएषपुरुषविधएव । तस्यपुरुषविधतां । अन्वयंपुरुषविधः । तस्ययजुरेवशिरः । ऋग्दक्षिणःपक्षः । सामोत्तरःपक्षः । आदेशआत्मा । अथर्वांगिरसःपुच्छंप्रतिष्ठा । तदप्येषश्लोकोभवति ३ यतोवाचोनिवर्तंते । अप्राप्यमनसासह । आनंदंब्रह्मणोविद्वान् । नबिभेतिकदाचनेति । तस्यैषएवशारीरआत्मा । यःपूर्वस्य । तस्माद्वाएतस्मान्मनोमयात् । अन्योंतरआत्माविज्ञानमयः । तेनैषपूर्णः । सवाएषपुरुषविधएव । तस्यपुरुषविधतां । अन्वयंपुरुषविधः । तस्यश्रद्धैवशिरः । ऋतंदक्षिणःपक्षः । सत्यमुत्तरःपक्षः । योगआत्मा । महःपुच्छंप्रतिष्ठा । तदप्येषश्लोकोभवति ४ विज्ञानंयज्ञंतनुते । कर्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णितनुतेपिंच। विज्ञानंदेवाःसर्वे। ब्रम्हज्येष्ठमुपासते। विज्ञानंब्रम्हचेद्वेद। तस्मा
च्चन्नप्रमाद्यति । शरीरेपाप्मनोहित्वा। सर्वान्कामान्समश्नुतइति। तस्यैषएव
शारीरआत्मा। यःपूर्वस्य। तस्माद्वाएतस्मादिज्ञानमयात्। अन्योंतरआत्मानंद-
मयः। तेनैषपूर्णः। सवाएषपुरुषविधएव। तस्यपुरुषविधतां। अन्वयंपुरुषविधः।
तस्यप्रियमेवशिरः। मोदोदक्षिणःपक्षः। प्रमोदउत्तरःपक्षः। आनंदआत्मा। ब्रह्म
पुच्छंप्रतिष्ठा। तदप्येषश्लोकोभवति५ असन्नेवसभवति। असद्ब्रह्मेतिवेदचेत्। अ
स्तिब्रह्मेतिंचेद्वेद। संतमेनंततोविदुरिति। तस्यैषएवशारीरआत्मा। यःपूर्वस्य॥
अथातोनुप्रश्नाः। उताविद्वानमुंलोकंप्रेत्य। कश्चनगच्छती ३ आहोंविद्वानमुंलो
कंप्रेत्य। काश्चित्समश्नुता ३उ। सोकामयत। बहुस्यांप्रजायेयेति। सतपोतप्यत।
सतपस्तप्त्वा। इदꣳसर्वंमसृजत। यदिदंकिंच। तत्सृष्ट्वा। तदेवानुप्राविशत्। त
दनुप्रविश्य। सच्चत्यवच्चाभवत्। निरुक्तंचानिरुक्तंच। निलयनंचानिलयनंच।

विज्ञानंविज्ञानंच। सत्यंचानृतंचसत्यमभवत्। यदिदंकिंच। तत्सत्यमित्याच-
क्षते। तदप्येषश्लोकोभवति ६ असद्वाइदमग्रआसीत्। ततोवैसदजायत। त
दात्मानꣳस्वयंमकुरुत। तस्मात्तत्सुकृतमुच्यतइति। यद्वैतत्सुकृतं। रसोवैसः।
रसꣳह्येवायंलब्ध्वानंदीभवति। कोह्येवान्यात्कःप्राण्यात्। यदेषआकाशआनं-
दोनस्यात्। एषह्येवानंदयाति। यदाह्येवैषएतस्मिन्नदृश्येनात्मेनिरुक्तेनिलयने
भयंप्रतिष्ठांविंदते। अथसोभयंगतोभवति। यदाह्येवैषएतस्मिन्नुदरमंतरंकुरुते
अथतस्यभयंभवति। तत्वेवभयंविदुषोमन्वानस्य। तदप्येषश्लोकोभवति ८
भीषास्माद्वातःपवते। भीषोदेतिसूर्यः। भीषास्मादग्निश्चेंद्रश्च। मृत्युर्धावतिपंच
मइति। सैषानंदस्यमीमाꣳसाभवति। युवास्यात्साधुयुवाध्यायकः। आशिष्ठोद-
ढिष्ठोबलिष्ठः। तस्येयंपृथिवीसर्वावित्तस्यपूर्णास्यात्। सएकोमानुषआनंदः। ते
येशतंमानुषाआनंदाः १ सएकोमनुष्यगंधर्वाणामानंदः। श्रोत्रियस्यचाकामह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यातेयेशतंमनुष्यगंधर्वाणांमानंदाः।सएकोदेवगंधर्वाणांमानंदः। श्रोत्रियस्य चाकामहतस्य। तेयेशतंदेवगंधर्वाणांमानंदाः।सएकःपितृणांचिरलोकलोकांमानंदः। श्रोत्रियस्यचाकामहतस्य । तेयेशतंपितृणांचिरलोकलोकानांमानंदाः। सएकआजानजानांदेवानांमानंदः २ श्रोत्रियस्यचाकामहतस्य । तेयेशतमाजानजानांदेवानांमानंदाः। सएकःकर्मदेवानांदेवानांमानंदः । येकर्मणादेवानपियंति। श्रोत्रियस्यचाकामहतस्य। तेयेशतंकर्मदेवानांदेवानांमानंदाः । सएकोदेवानांमानंदाः। श्रोत्रियस्यचाकामहतस्य। तेयेशतंदेवानांमानंदाः। सएकइंद्रस्यानंदः३श्रोत्रियस्यचाकामहतस्य। तेयेशतमिंद्रस्यानंदाः। सएकोबृहस्पतेरानंदः। श्रोत्रियस्यचाकामहतस्य । तेयेशतंबृहस्पतेरानंदाः। सएकःप्रजापतेरानंदः। श्रोत्रियस्यचाकामहतस्य। तेयेशतंप्रजापतेरानंदाः। सएकोब्रह्मणआनंदः। श्रोत्रियस्यचाकामहतस्य ४ सयश्चायंपुरुषे । यश्चासावादित्ये। सएकः।

सयएवंवित्। अस्माल्लोकात्प्रेत्य। एतमन्नमयमात्मानमुपसंक्रामति। एतंप्राणमयमात्मानमुपसंक्रामति। एतंमनोमयमात्मानमुपसंक्रामति । एतंविज्ञानमयमात्मानमुपसंक्रामति।एतमानंदमयमात्मानमुपसंक्रामति।तदप्येषश्लोकोभवति ८ यतोवाचोनिवर्तंते । अप्राप्यमनसासह। आनंदंब्रह्मणोविद्वान् । नबिभेतिकुतश्चनेति। एत *हवावंनतपति। किमह *साधुनाकरवं। किमहंपापमकरंबमिति। ।सयएवंविद्वानेतेआत्मान *स्पृणुते। उभेह्येवैषयेतेआत्मान *स्पृणुते। यएवंवेद। इत्युपनिषत् ९ सहनाववतु। सहनौभुनक्तु। सहवीर्यंकरवावहै । तेजस्विनावधीतमस्तुमाविद्विषावहै। ॐशांतिःशांतिःशांतिः । इतितैतिरियब्रह्मविदोपनिषत्समाप्तिमगमत्। ब्रह्मविदिदमयमिदमेकवि *शतिरन्नादरसमयात्। प्राणाव्यानोपानआकाशःपृथिवीपुच्छ *षड्वि *शतिःप्रणंयजुरुक्सामादेशोथर्वांगीरसःपुच्छंद्ठावि *शतिर्यतः । श्रद्धैत *सत्यंयोगोमहोष्टादशविज्ञानांप्रियंमोद-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आनंदोब्रह्मपुच्छंद्यावि*शतिरसन्नेवाथाष्टावि*शतिरसषोडशभीषास्मादेकपं-
चाशद्यतः। कुतश्चनैकादश। लोकःसरस्वत्यायांत्यैषवैदेवयानःपंथास्तमेवान्वा
रोहंत्याक्रोशंतोयांत्यवर्तिमेवाऽन्यस्मिन्प्रतिषज्यंप्रतिष्ठांगच्छंतियदादशंशतं-
कुर्वंत्यथैकमुत्थान*शतायुःपुरुषःशतेंद्रिय आयुष्येवेंद्रियेप्रतितिष्ठंतियदाश*स
हस्रंकुर्वंत्थयैकमुत्थान*सहस्रंसम्मितोवाअसौलोकोमुमेवलोकमाभिजयंतियदे-
षांप्रमीयैतयदावाजीयैरन्नथैकमुत्थानंतद्वितीर्थं १ भृगूपनिषत्प्रा०। श्रीगणेशा
य०। हरिॐ। सहनाववतु। सहनौभुनक्तु। सहवीर्यंकरवावहैतेजस्विनावधीतम-
स्तुमाविद्विषावहै। ॐशांतिःशांतिःशांतिः। ॐभृगुर्वैवारुणिः। वरुणंपितरमुपस
सार। अधीहिभगवोब्रह्मेति। तस्मएतत्प्रोवाच। अन्नंप्राणंचक्षुश्रोत्रंमनोवाच-
मिति। त*होवाच। यतोवाइमानिभूतानिजायंते। येनजातानिजीवंति। यत्प्रयं-
त्याभिसंविशंति। तद्विजिज्ञासस्वतद्ब्रह्मेति। सतपोतप्यत। सतपःस्तप्त्वा १ अ-

न्नंब्रह्मेतिव्यजानात्। अन्नाद्ध्येवखल्विमानिभूतानिजायंते। अन्नेनजातानिजीवं
ति। अन्नंप्रयंत्यभिसंविशंतीतितद्विज्ञाय। पुनरेववरुणंपितरमुपससार। अधीहि
भगवोब्रह्मेति। त*होवाच। तपसाब्रह्मविजिज्ञासस्व। तपोब्रह्मेति। सतपोतप्यत
सतपस्तप्त्वा २ प्राणोब्रह्मेतिव्यजानात्। प्राणाद्ध्येवखल्विमानिभूतानिजायंते। प्रा
णेनजातानिजीवंतिप्राणंप्रयंत्यभिसंविशंतीति। तद्विज्ञाय। पुनरेववरुणंपितरमुप
ससार। अधीहिभगवोब्रह्मेति। त*होवाच। तपसाब्रह्मविजिज्ञासस्व। तपोब्रह्मेति
सतपोतप्यत। सतपस्तप्त्वा ३ मनोब्रह्मेतिव्यजानात्। मनसोह्येवखल्विमानिभू
तानिजायंते। मनसाजातानिजीवंति। मनःप्रयंत्यभिसंविशंतीतितद्विज्ञाय। पुनरे
ववरुणंपितरमुपससार। अधीहिभगवोब्रह्मेति। त*होवाच। तपसाब्रह्मविजिज्ञा
सस्व। तपोब्रह्मेति। सतपोतप्यत। सतपस्तप्त्वा ४ विज्ञानंब्रह्मेतिव्यजानात्। विज्ञा
नाद्ध्येवखल्विमानिभूतानिजायंते। विज्ञानेनजातानिजीवंति। विज्ञानंप्रयंत्यभिसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विशंतीति । तद्विज्ञाय । पुनरेववरुणंपितरमुपससार । अधीहिभगवोब्रह्मेति । तꣳ
होवाच । तपसाब्रह्मविजिज्ञासस्व । तपोब्रह्मेति । सतपोतप्यत । सतपस्तप्त्वा ५
आनंदोब्रह्मेतिव्यजानात् । आनंदाद्ध्येवखल्विमानिभूतानि जायंते । आनंदेनजा
तानिजीवंति । आनंदंप्रयंत्यभिसंविशंतीति । सैषाभार्गवीवारुणीविद्या । परमे-
व्योमन्प्रतिष्ठिता । यएवंवेदप्रतितिष्ठति । अन्नवानन्नादोभवति । महान्भवतिप्र
जयापशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ६ अन्नंननिंद्यात् । तद्व्रतं । प्राणोवाअन्नं ।
शरीरमन्नादं । प्राणेशरीरंप्रतिष्ठितं । शरीरेप्राणःप्रतिष्ठितः । तदेतदन्नमन्नेप्रतिष्ठि
तं । सयएतदन्नमन्नेप्रतिष्ठितंवेदंप्रतितिष्ठति । अन्नवानन्नादोभवति । महान्भव
ति । प्रजयापशुभिर्ब्रह्मवर्चसेन । महानकीर्त्या ७ अन्नंनपरिचक्षीत । तद्व्रतं । आ-
पोवाअन्नं । ज्योतिरन्नादं । अप्सुज्योतिःप्रतिष्ठितं । ज्योतिष्यापःप्रतिष्ठिताः । तदे
तदन्नमन्नेप्रतिष्ठितं । सयएतदन्नमन्नेप्रतिष्ठितंवेदप्रतितिष्ठति । अन्नवानन्नादोभ

वति । महान्भवतिप्रजयापशुभिर्ब्रह्मवर्चसेन । महानकीर्त्या ८ अन्नंबहुकुर्वीत ।
तद्व्रतं । पृथिवीवाअन्नं । आकाशोन्नादः । पृथिव्यामाकाशःप्रतिष्ठितः । आकाशेप्
थिवीप्रतिष्ठिता । तदेतदन्नमन्नेप्रतिष्ठितम् । सयएतदन्नमन्नेप्रतिष्ठितंवेदप्रतितिष्ठ
ति । अन्नवानन्नादोभवति । महान्भवतिप्रजयापशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या
९ नकंचनवसतौप्रत्याचक्षीत । तद्व्रतम् । तस्माद्ययाकयाचविधयाबह्वन्नंप्राप्नुया
त् । अराध्यस्माअन्नमित्याचक्षते । एतद्वैमुखतोन्नꣳराद्धं । मुखतोस्माअन्नꣳरा
ध्यते । एतद्वैमध्यतोन्नराद्धं । मध्यतोस्माअन्नꣳराध्यते । एतद्वाअंततोन्नꣳराद्धं । अं
ततोस्माअन्नꣳराध्यते १ यएवंवेद । क्षेमइतिवाचि । योगक्षेमइतिप्राणापानयोः ।
कर्मेतिहस्तयोः । गतिरितिपादयोः । विमुक्तिरितिपायौ । इतिमानुषीःसमाज्ञाः ।
अथदैवीः । तृप्तिरितिवृष्टौ । बलमितिविद्युति २ यशइतिपशुषु । ज्योतिरितिन-
क्षत्रेषु । प्रजातिरमृतमानंदइत्युपस्थे । सर्वमित्याकाशे । तत्प्रतिष्ठेत्युपासीत ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतिष्ठावान्भवति। तन्महइत्युपासीत। महान्भवति। तन्मनइत्युपासीत। मान
वान्भवति ३ तन्नमइत्युपासीत। नम्यंतेस्मैकामाः। तद्ब्रह्मेत्युपासीतब्रह्मवान्भव
ति। तद्ब्रह्मणःपरिमरइत्युपासीत। पर्येणंम्रियंतेद्विषंतःसपत्नाः। परियेप्रियाभ्रातृ
व्याः। सयश्चायंपुरुषे। यश्चासावादित्ये। सएकः ४ सयएवंवित्। अस्माल्लोकात्प्रे-
त्य। एतमन्नमयमात्मानमुपसंक्रम्य। एतंप्राणमयमात्मानमुपसंक्रम्य। एतंमनो
मयमात्मानमुपसंक्रम्य। एतंविज्ञानमयमात्मानमुपसंक्रम्य। एतमानंदमयमा-
त्मानमुपसंक्रम्य। इमाँल्लोकान्कामान्नीकामरूप्यनुसंचरन्। एतत्सामगायन्नास्ते
। हा ३ वुहा ३ वुहा ३ वुं। अहमन्नमहमन्नमहमन्नं। अहमन्नादो ३ ओहमन्नादो ३ ओ
हमन्नादः। अहश्लोककृदहश्लोककृददश्लोककृत्। अहमस्मिप्रथमजाऋता ३
स्य। पूर्वंदेवेभ्योअमृतस्यना ३ भायि। योमाददातिसइदेवमा ३ वाहृ। अहमन्नम
न्नमदंतमा ३ द्मि। अहंविश्वंभुवनमभ्यभवां। सुवर्नज्योतीः। यएवंवेद। इत्युपनि

षत्। सहनाववतु। सहनौभुनक्तु। सहवीर्यंकरवावहै । तेजस्विनावधीतमस्तुमा
विद्विषावहै ॐ शांतिःशांतिःशांतिः भृगुस्तस्मैयतोविकृतिंतद्विजिज्ञासस्व। त्रयो
दशान्नंप्राणोमनोविज्ञानमिति। यिज्ञायतंतपसाद्वादशानंदइति। सेषादशान्नंन
निंद्यात्। प्राणःशरीरमन्ननपरिचक्षीतापोज्योतिरन्नं। बहुकुर्वीतपृथिव्यामाकाश
एकादशैकादशनकंचनैकषष्टिर्दश। तितैत्तिरीयेतेभृगूपनिषत्संपूर्णः ॥ ७ ।
नारायणउपनिषत्प्रारंभः। श्रीगणेशंवंदे। ॐ सहनाववतु। सहनौभुनक्तु। सह
वीर्यंकरवावहै। तेजस्विनावधीतमस्तुमाविद्विषावहै। ॐ शांतिःशांतिःशांतिः।
अंभस्यपारेभुवनस्यमध्येनाकस्यपृष्ठेमहतोमहीयान्। शुक्रेणज्योतीषिसमनु-
प्रविष्टःप्रजापतिश्चरतिगर्भेअंतः। यस्मिन्निदंसंचविचैतिसर्वंयस्मिन्देवाअ-
धिविश्वेनिषेदुः। तदेवभूतंतदुभव्यमाइदंतदक्षरेपरमेव्योमन्। येनावृतंखंचदि
वंमहींचयेनादित्यस्तपतितेजसाभ्राजसाच। यमंतःसमुद्रेकवयोवयंतियदक्षरेप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रमेप्रजाः । यतःप्रसूताजगतःप्रसूतीतोयेनजीवान्व्यचसर्जभूम्यां । यदोषधी-
भिःपुरुषान्पशू*श्चाविवेशभूतानिचराचराणि । अतःपरन्नान्यदणीयस*ह्मिपरा
त्परंयन्महतोमहांतं । यदेकमव्यक्तमनंतरूपंविश्वंपुराणंतमसःपरस्तात् १ तदे
वर्तंतदुसत्यमाहुस्तदेवब्रह्मपरमंकवीनां । इष्टापूर्तंबहुधाजातंजायमानंविश्वंबि-
भर्तिभुवनस्यनाभिः । तदेवाग्निस्तद्वायुस्तत्सूर्यःस्तदुचंद्रमाः । तदेवशुक्रममृतं-
तब्रम्हतदापःसप्रजापतिः । सर्वेनिमेषाज्ज्ञिरेविद्युतःपुरुषादधि । कलामुहूर्ताः
काष्ठाश्चाहोरात्राश्चसर्वशः । अर्धमासामासाऋतवःसंवत्सरश्चकल्पंतां । सअपः
प्रदुघेउभेइमेअंतरीक्षमथोसुवः । नैनमूर्ध्वंनातिर्यंचंनमध्येपरीजग्रभत् । नतस्थे
शेकश्चनतस्यनाममहद्यशः २नसंदृशेतिष्ठतिरूपमस्यनचक्षुषापश्यतिकश्चनैनं
हृदामनीषामनसाभिक्लृप्तोयएनंविदुरमृतास्तेभवंति । अज्यःसंभूतोहिरण्यगर्भइ
त्यष्टौ । एषहिदेवःप्रदिशोनुसर्वाःपूर्वोहिजातःसउगर्भेअंतः । सविजायमानःस-

जनिष्यमाणःप्रत्यङ्मुखास्तिष्ठतिविश्वतोमुखः । विश्वतश्चक्षुरुतविश्वतोमुखो-
विश्वतोहस्तउतविश्वतस्पात् । संबाहुभ्यांनमतिसंपतत्रैर्द्यावापृथिवीजनयंदेव
एकः । वेनस्तत्पश्यन्विश्वाभुवनानिविद्वान्यत्रविश्वंभवत्येकनीळं । यस्मिन्निद
श्*संचविचैक*श्*सओतःप्रोतश्चविभुप्रजासु । प्रतद्वोचेअमृतन्नविद्वान्गधंर्वोनाम
निहितंगुहासु ३ त्रीणिपदानिहितागुहासुयस्तद्वेदसवितुःपितासत् । सनोबंधुज
नितासाविधाताधामानिवेदभुवनानिविश्वा। यत्रदेवाअमृतमानशानाःस्तृतीयेधा
मन्यभ्यैरयंत । परिद्यावापृथिवीयंतिसद्यः । परिलोकान्परिदिशःपरिसुवः । ऋत
स्यतंतुंविततंविचृत्यतदपश्यत्तदभवत्प्रजासु । परीत्यलोकान्परीत्यभूतानिपरी
त्यसर्वाःप्रदिशोदिशश्च । प्रजापतिःप्रथमजाऋतस्यात्मनात्मानमभिसंबभूव ।
सदसस्पतिमद्भुतंप्रियमिंद्रस्यकाम्यं । सनिंमेधामयासिषं । उद्दीप्यस्वजातवेदो-
पघ्नंनिर्ऋतिंमम ४ पशू*श्चमह्यमावहजीवनंचदिशोदिश । मानोहि*सीज्जातवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दोगामश्वंपुरुषंजगत्। अविभ्रदग्नआगहिश्रियामापरिपातय। पुरुषस्याविश्वस-
हस्राक्षस्यमहादेवस्यधीमहि। तन्नोरुद्रःप्रचोदयात्। तत्पुरुषायविद्महेमहादेवा
यधीमहि। तन्नोरुद्रःप्रचोदयात्। तत्पुरुषायविद्महेवक्रतुंडायधीमहि ५ तन्नोदं-
तिःप्रचोदयात्। तत्पुरुषायविद्महेचक्रतुंडायधीमहि। तन्नोनंदिःप्रचोदयात्। त
त्पुरुषायविद्महेमहासेनायधीमहि। तन्नःषण्मुखःप्रचोदयात्। तत्पुरुषायविद्महे
सुवर्णपक्षायधीमहि। तन्नोगरुडःप्रचोदयात्। वेदात्मनायविद्महेहिरण्यगर्भाय
धीमहि। तन्नोब्रह्मप्रचोदयात्।नारायणायविद्महेवासुदेवायधीमहि।तन्नोविष्णुः
प्रचोदयात्। वज्रनखायविद्महेतीक्ष्णदंष्ट्रायधीमहि ६ तन्नोनारसिंहःप्रचोद
यात्। भास्करायविद्महेमहद्युतिकरायधीमहि।तन्नोआदित्यःप्रचोदयात्। वैश्व
नरायविद्महेलालीलायधीमहि। तन्नोअग्निःप्रचोदयात् । कात्यायनायविद्महेक-
न्यकुमारिधीमहि।तन्नोदुर्गिःप्रचोदयात् ।सहस्रपरमादेवीशतमूला। शतांकुरा

सर्वंहरतुमेपापंदूर्वादुस्वप्ननाशिनी । कांडात्कांडात्प्ररोहंतीपरुषःपरुषःपरि ७
एवानोदूर्वेप्रतनुसहस्रेणशतेनच। यांशतेनप्रतनोषिसहस्रेणविरोहसि। तस्या
स्तेदेवीष्टकेविधेमहविषाव्ययं।अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरा। शिरसाधा
रयिष्यामिरक्षस्वमांपदेपदे।भूमिर्धेनुर्धरणीलोकधारिणी।उद्धृतासिवराहेणकृष्णे
नशतबाहुना। मृत्तिकेहनमेपापंयन्मयादुष्कृतंकृतं। मृत्तिकेब्रह्मदत्तासिकाश्यपे
नाभिमंत्रिता। मृत्तिकेदेहिमेपुष्टिंत्वयिसर्वंप्रतिष्ठितं ८ मृत्तिकेप्रतिष्ठितेसर्वंतन्मे
निर्णुदमृत्तिके। तयाहतेनपापेनगच्छामिपरमांगतिं। यतइंद्रभयामहेततोनोअ
भयंकृधि । मघवंच्छग्धितवतन्नऊतयेविद्विषोविमृधोजहि । स्वस्तिदाविश-
स्पतिर्वृत्रहाविमृधोवशी। वृषेंद्रःपुरएतुनः। स्वस्तिदाअभयंकरः। स्वस्तिनइंद्रो
वृद्धश्रवास्वस्तिनःपूषाविश्ववेदाः। स्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनोबृह-
स्पतिर्दधातु। आपोतमन्युस्तृपलप्रभर्माधुनिःशमीवांछरुमाँऋजीषी। सोमो-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वान्यतसावनानिनार्वा। गिंद्रंप्रतिमानांनिदेभुः ९ ब्रंह्मंजज्ञानंप्रथमंपुरस्ता-
द्विसींमतःसुरुचोंवेनआवः। सबुध्नियांउपमाअंस्यविष्ठाःसतश्चयोनिमसंतश्चवि-
वः। स्योनाप्रंथिविभवान्नक्षरानिवेशंनी। यच्छांनःशर्मसप्रथाः। गंधद्वारांदुराधर्षां
नित्यपुंष्टांकरीषिणीं। इश्वरींसर्वभूतानांतामिहोपंव्हयेश्रियं। श्रीर्मेभजतु। अ-
लक्ष्मीर्मेनश्यतु। विष्णुंमुखावैदेवाश्छंदोभिर्पुरीमांल्लोकानंनपजय्यमभ्यंजयन्। म
हाइंद्रोवज्रंबाहुःषोडशीशर्मंयच्छतु १० स्वस्तिनोंमघवांकरोतुहंतुंपाप्मानंयो
स्मांद्वेष्टिं। सोमानस्वरंणंकृणुहिब्रंह्मणस्पते।कक्षीवंतंयऔशिजं।शरींरंयज्ञशा।
मलंकुसींदंतस्मिन्सीदतुयोस्मांद्वेष्टिं। चरंणंपवित्रंवितंतंपुराणंयेनंपूतःस्तरंति-
दुष्कृतानिं। तेनंपवित्रेंणशुद्धेनंपूताअतिंपाप्मानमरांतिंतरेम। सजोषांइंद्रसग-
णोमरुद्भिःसोमंपिबवृत्रहंच्छूरविद्वान्। जहिशत्रूरपमृधोनुदस्वाथाभयंकृणुहि-
विश्वतोनः। सुमित्रानआपओषधयःसंतुदुर्मित्रास्तस्मैभूयासुर्योस्मांद्वेष्टियंचवं-

यंद्विष्मः।आपोहिष्ठामयोभुवस्तानऊर्जेदधातन ११महेरणायचक्षसे। योवःशिव
तमोरसस्तस्यभाजयतेहनः। उशतीरिवमातरः। तस्माअरंगमामवोयस्यक्षयाय
जिन्वथ। आपोजनयथाचनः। हिरण्यशृंगंवरुणंप्रपद्येतीर्थमेदेहियाचितः।य
न्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः।यन्मेमनसावाचाकर्मणावादुष्कृतंकृतं-
तन्नइंद्रोवरुणोबृहस्पतिःसविताचपुनंतुपुनःपुनः। नमोग्नयेपृथिवीक्षितेनमइंद्रायन-
मोवरुणायनमोवारुण्यैनमोभ्रः १२यदपांक्रूरंयदमेध्यंयदशांतंतदपगच्छतात्।
अत्याशनादतीपानाद्यच्चउग्रात्प्रतिग्रहात्। तन्नोवरुणोराजापाणिनाह्यवमर्शतु।
सोहमपापोविरजोनिमुक्तोमुक्तकिल्बिषः । नाकस्यपृष्ठमारुह्यगच्छेत्ब्रह्मसलोक
तां। यश्चाप्सुवरुणःसपुनात्वघमर्षणः।इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंस
चतापरुष्णिया। असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया। ऋतंच
सत्यंचाभीद्धात्तपसोध्यजायत। ततोरात्रिरजायततःसमुद्रोअर्णवः १३समुद्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्दर्णवादधिसंवत्सरोअजायत। अहोरात्राणिविदधद्विश्वस्यमिषतोवशी। सूर्याचंद्रमसौधातायथापूर्वमकल्पयत्। दिवंचपृथिवींचांतरिक्षमथोसुवः। यत्पृथिव्या *रजस्वमांतरिक्षेविरोदसी। इमा *स्तदापोवरुणःपुनात्वघमर्षणः। पुनंतुवसवःपुनातुवरुणःपुनात्वंघमर्षणः। एषभूतस्यमध्येभुवनस्यगोप्ता। एषपुण्येकृतांनल्लोकानेषमृत्योर्हिरण्मयः। द्यावापृथिव्योर्हिरण्मय *स *श्रितसुवः १४ सनसुवः स *शिशाधि। आर्द्रज्वलंतिज्योतिरहमस्मि। ज्योतिर्ज्वलंतिब्रम्हाहमस्मि। योहमस्मिब्रम्हाहमस्मि। अहमस्मिब्रम्हाहमस्मि। अहमेवाहंमांजुहोमिस्वाहा। अकार्यकार्यंवकीर्णीस्तेनोभ्रूणहागुरुतल्पगः। वरुणोपामघमर्षणस्तस्मात्पापात्प्रमुच्यते। रजोभूमिस्त्वमा *रोदयस्वप्रवदंतिधीराः। आक्रान्त्समुद्रःप्रथमेविधर्मन्जनयन्प्रजाभुवनस्यराजा। वृषापवित्रेअधिसानोअव्येबृहत्सोमोवावृधेसुवानइंदुः १५ परस्ताद्यज्ञोगुहासुममंचक्रतुंडायधीमहितीक्ष्णद *ष्ट्रायधीम-

द्विपरिप्रतिष्ठितंदेभूर्यच्छतुदधातनाद्यौर्णवःसुवोराजैकंच १ रुद्रोरुद्रश्चंद्रांतिश्वनंदिःषण्मुखएवंच। गरुडोब्रम्हाविष्णुश्चनारसि *हस्तथैवच। आदित्योग्निश्चंद्रुग्गिश्चक्रमेणद्वादशांभसि १२ ममवचमसुवेनावभावैकात्यायनायं। जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः।सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः। तामग्निवर्णांतपसाज्वलंतींवैरोचनींकर्मफलेषुजुष्टां। दुर्गांदेवी *शरणमहंप्रपद्येसुतरांसितरसेनमः।अग्नेत्वंपारयानव्योअस्मान्त्स्वस्तिभिरतिदुर्गाणिविश्वा। पूश्चंपृथ्वीबहुलानउर्वीभवातोकायतनायशंयोः। विश्वानिनोदुर्गहाजातवेदःसिंधुन्ननावादुरितातिपर्षि। अग्नेअत्रिवन्मनसागृणानोस्माकंबोध्यविताततनूनां। पृतनाजित *सहमानमुग्रमग्नि *हुवेमपरमात्सधस्थात्। सनःपर्षदतिदुर्गाणिविश्वाक्षामद्देवोअतिदुरितात्यग्निः। प्रत्नोषिकमीड्योअध्वरेषुसनाच्चहोतानव्यश्चसत्सि। स्वांचाग्नेतनुवंपिप्रयस्वास्मभ्यंचसौभगमायजस्व। गोभिर्जु-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्टुमयुजोनिषिक्तंतवैंद्रविष्णोरनुसंचरेम। नाकस्यपृष्ठमभिसंवसानोवैष्णवींलो-
कइहमादयंतां (अग्निश्चत्वारीच) भूरन्नमग्नयेपृथिव्यैस्वाहाभुवोन्नोवायवेंतरिक्षा
यस्वाहासुवरन्नमादित्यायंदिवेस्वाहाभूर्भुवःसुवरन्नचंद्रमसेदिग्भ्यस्वाहानमोदे
वेभ्यंःस्वधापितृभ्योभूर्भुवसुवरन्नमों ३ भूरग्नयेपृथिव्यैस्वाहाभुवोवायवेंतरिक्षा
यस्वाहासुवरादित्यायंदिवेस्वाहाभूर्भुवसुवश्चंद्रमसेदिग्भ्यस्वाहानमोदेवेभ्यंः।
स्वधापितृभ्योभूर्भुवसुवरग्नअँ ४ भूरग्नयेचपृथिव्यैचंमहतेचस्वाहाभुवोवायवै
चांतरिक्षायचमहतेचस्वाहासुवरादित्यायंचादिवेचंमहतेचस्वाहाभूर्भुवः सुवश्चं
द्रमसेचनक्षत्रेभ्यश्चदिग्भ्यश्चंमहतेचस्वाहानमोदेवेभ्यंः स्वधापितृभ्योभूर्भुवः
सुवर्महरोम् ५ पाहिनोअग्नएनंसेस्वाहा। पाहिनोविश्ववेदंसेस्वाहा। यज्ञंपाहिवि
भावंसोस्वाहा। सर्वंपाहिशतक्रतोस्वाहा। पाहिनोअग्नएकया। पाह्युतद्वितीयंया
पाह्यूजंतृतीयया। पाहिगीर्भिश्चतसृभिर्वसोस्वाहा ६ यश्छंदसामृषभोविश्वरूप-

श्छंदोभ्यश्छंदाश्स्याविवेश। सचाश शिक्षयःपुरोवाचोपनिषदिंद्रोज्येष्ठइंद्रियाय
ऋषिभ्योनमोदेवेभ्यंःस्वधापितृभ्योभूर्भुवःसुवश्छंदओम्। नमोब्रह्मणेधारणंमे
अस्त्वनिराकरणंधारयितामूयासंकर्णयोःश्रुतंमाच्योढ्ममामुष्यओम् ७ ऋतंत
पःसत्यंतपःश्रुतंतपःशांतंतपोदमस्तपःशमस्तपोदानंतपोयज्ञंतपोभूर्भुवःसुवर्ब्र
म्हैतदुपास्यैतत्तपः ८ यथावृक्षस्यसंपुष्पितस्यदूराद्गंधोवात्येवंपुण्यस्यकर्मणो-
दूराद्गंधोवातियथासिधारांकर्तंवहितामवक्रामेयद्युवेयुवेहवा विव्हायिष्यामिक-
र्तंपतिष्यामीत्येवममृतादात्मानंजुगुप्सेत् ११ अणोरणीयान्महतोमहीयानात्मा-
त्मागुहायांनिहितोस्यजंतोः। तमक्रतुंपश्यतिवीतशोकोधातुः प्रसादान्महिमा-
नमीशं। सप्तप्राणाः प्रभवंतितस्मात्सप्तार्चिषः समिधः सप्तजिव्हाः। सप्तइमे
लोकायेषुचरंतिप्राणागुहाशयान्निहिताः सप्तसप्त। अतः समुद्रागिरयश्चसर्वेस्मा
त्स्यंदंतेसिंधवःसर्वरूपा। अतश्चविश्वाओषधयोरसाश्चयेनैषभूतस्तिष्ठत्यंतरात्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

। ब्रह्मादेवानांपदवीःकवीनामृषिर्विप्राणांमहिषोमृगाणां। श्येनोगृध्राणा*स्वधिति र्वनाना*सोमःपवित्रमत्येतिरेभन्। अजामेकांलोहितशुक्लकृष्णांबह्वीं प्रजांजनयंती*सरूपां। अजोह्येकोजुषमाणोनुशेतेजहात्येनांभुक्तभोगामजोन्यः १ ह्* सशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसद्-ब्जागोजाऋतजाअद्रिजाऋतंबृहत्। घृतंमिमिक्षिरेघृतमस्ययोनिर्घृतेश्रितोघृत मुवस्यधामा। अनुष्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यं। समुद्रादूर्मिर्मधुमा*उदारदुपा*शुनासमंमृतत्वमानट्। घृतस्यनामगुह्यंयदस्तिजिह्वादेवानां ममृतस्यनाभिः। वयंनामप्रब्रवामाघृतेनास्मिन्यज्ञेधारयामानमौभिः। उपब्रह्मा शृणवच्छस्यमानंचतुःशृंगोवमीद्गौरएतत्। चत्वारिशृंगात्रयोअस्यपादाद्वेशी-र्षेसप्तहस्तासोअस्य। त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यां*आविवेश २ त्रि धाहितंपणिभिर्गुह्यमानंगविदेवासोघृतमन्वविंदन्। इंद्रएक*सूर्यएकंजजानवे-

नादेक*स्वधयानिष्टतक्षुः। योदेवानांप्रथमंपुरस्ताद्विश्वाधियोरुद्रोमहर्षिः। हि-रण्यगर्भंपश्यतजायमान*सनोदेवःशुभयास्मृत्याःसंयुनक्तु। यस्मात्परन्नापरम स्तिकिंचिद्यस्मान्नाणीयोनज्यायोस्तिकश्चित्। वृक्षइवस्तब्धोदिवितिष्ठत्येकस्ते नेदंपूर्णंपुरुषेणसर्वं। नकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशुः। परेण नाकंनिहितंगुहायांबिभ्राजदेतद्यतयोविशंति। वेदांतविज्ञानसुनिश्चितार्थाः। संन्यासयोगाद्यतयःशुद्धसत्वाः। तेब्रह्मलोकेतुपरांतकालेपरामृतात्परिमुच्यंति सर्वे। दह्रंविपापंपरमेश्मभूतंयत्पुंडरीकंपुरमध्यस्*स्थं। तत्रापिदह्रंगगनंविशो कःस्तस्मिन्यदंतःतदुपासितव्यं। योवेदादौस्वरः प्रोक्तोवेदांतेचप्रतिष्ठितः। त-स्यप्रकृतिलीनस्ययःपरंसमहेश्वरः ३ अजोन्याआविवेशसर्वंचत्वारिंच १२ सह स्रशीर्षंदेवंविश्वाक्षंविश्वशंभुवं। विश्वैनारायणंदेवमक्षरंपरमंपदं। विश्वतःपरमा न्नित्यंविश्वंनारायण*हरिं। विश्वमेवेदंपुरुषस्तद्विश्वमुपजीवति। पतिंविश्वस्या-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्मेश्वर * शाश्वत * शिवमच्युतं । नारायणंमहाज्ञेयंविश्वात्मानंपरायणं । नारायणपरज्योतिरात्मानारायणपरः । नारायणपरंब्रम्हतत्वंनारायणःपरः । नारायणपरोध्याताध्यानंनारायणःपरः । यच्चकिंचिज्जगत्सर्वंदृश्यतेश्रूयतेपिव १ अंतर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थितः । अनंतमव्ययंकविं * समुद्रंतींवेश्वशंभुवं । पद्मकोशप्रतीकाश * हृदयंचाप्यधोमुखं । अधोनिष्ठावितस्त्यांतेनाभ्यामुपरितिष्ठति । ज्वालमालाकुलंभातिविश्वस्यायतनंमहत । संतत * शिलाभिस्तुलंबत्याकोशसन्निभं । तस्यांतैसुषिर * सूक्ष्मंतस्मिन्त्सर्वप्रतिंष्ठितं । तस्यमध्यैमहानग्निर्विश्वार्चिर्विश्वतोमुखः । सोग्रभुग्विभजंतिष्ठन्नाहारमजरःकविः । तिर्यगूर्ध्वमधःशायीरश्मयस्तस्यसंतता । संतापयतिस्वंदेहमापादतलमस्तगः तस्यमध्येवह्निशिखाअणीयोर्ध्वाव्यवस्थिता । नीलतोयदमध्यस्थाद्विद्युल्लेखेवभास्वरा । नीवारशूकवत्तन्वी पीताभास्वत्यणूपमा । तस्याशिखायामध्येपरमात्माव्यवस्थितः । सब्रम्हःसाशि-

वःसहरिःसेंद्रःसोक्षरःपरमस्वराट् २ अपिवासंतंताषट्चां ३ आदित्योवाएषएतन्मंडलंतपतितव्रताऋचस्तद्दचामँडल * सऋचांलोकोथयएषएतस्मिँमंडलेर्चिर्दीप्यतेतानिसामानिससाम्नांल्लोकोथयएषएतस्मिन्मंडलेर्चिषिपुरुषस्तानियजूं * षिसयजुंषामंडल * सयजूंषांलोकःसैषात्रय्येवंविद्यातपतियएषोंतरादित्येहिरण्मयःपुरुषः १४ आदित्योवैतेज ओजोबलंयशःश्चक्षुःश्रोत्रंमात्मामनोंमन्युर्मनुंर्मृत्युःसत्योमित्रोवायुराकाशःप्राणोलोकपालःकःकिंकंतत्सत्यमन्नंममृतौ जीवोविश्वंःकतमःस्वयंभुब्रम्हैतदमृतएषपुरुषएषभूतानामधिपतिर्ब्रम्हंणासायुज्य * सलोकतांमाप्नोत्येतासामेवदेवतानां * सायुज्य * सार्ष्टिता * समानलोकतांमाप्नोतियएवंवेदेत्युपनिषत् १५ निधनपतयेनमः । निधनपतांतिकायनमः । ऊर्ध्वायनमः । ऊर्ध्वलिंगायनमः । हिरण्यायनमः । हिरण्यलिंगायनमः । सुवर्णायनमः । सुवर्णलिंगायनमः । दिव्यायनमः । दिव्यलिंगायनमः । भवायनमः । भव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लिंगायनमः। शर्वायनमः। शर्वलिंगायनमः। शिवायनमः। शिवलिंगायनमः। ज्व
लायनमः। ज्वललिंगायनमः। आत्मायनमः । आत्मलिंगायनमः । परमायनमः
। परमलिंगायनमः। एतत्सोमस्यसूर्यस्यसर्वलिंग*स्थापयतिप्राणिमंत्रैपवित्रं।
सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः। भवेभवेनातिभवेभवस्वमां। भवो
द्भवायनमः १७वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकालायनमःक
लंविकरणायनमोबलंविकरणायनमोबलायनमोबलंप्रमथनायनमः सर्वभूतदम
नायनमोमनोन्मनायनमः १८अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः। सर्वेभ्यःस
र्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः १९तत्पुरुषायविद्महेमहादेवायधीमहि। तन्नो
रुद्रःप्रचोदयात्२० ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणो
धिपतिर्ब्रह्मांशिवोमेअस्तुसदाशिवों २१ नमोहिरण्यबाहवेहिरण्यवर्णायहिरण्य
रूपायहिरण्यपतयेंबिकापतयउमापतयेपशुपतयेनमोनमः२२ऋत*सत्यंपरंब्र-

म्हपुरुषंकृष्णपिंगलं। ऊर्ध्वरेतंविरूपाक्षंविश्वरूपायवैनमोनमः २३ सर्वोवैरुद्रः
स्तस्मैरुद्रायनमोअस्तु। पुरुषोवैरुद्रःस्तन्महोनमोनमः। विश्वंभूतंभुवनंचित्रंब-
हुधाजातंजायमानंचयत्। सर्वोह्येषरुद्रस्तस्मैरुद्रायनमोअस्तु २४ कद्रुद्रायप्रचे
तसेमीढुष्टमायतव्यसे। वोचेमशंतम*हृदे। सर्वोह्येषरुद्रास्तस्मैरुद्रायनमोअस्तु
२५ यस्यवैकैकत्यग्निहोत्रहवणीभवतिप्रत्येवास्याहुतयः स्तिष्ठंत्यथोप्रतिष्ठित्यै
२६ कृणुष्वपाजइतिपंच २७ अदितिर्द्यौरदितिरंतरिक्षमदितिर्मातासपितासपुत्रः
विश्वेदेवाअदितिःपंचजनाअदितिर्जातमदितिर्जनित्वम्। सर्वेभूतानांमातामेदिनीमहतामहीसावित्रीगायत्रीजगत्यूर्वीपृथ्वीबहुलाविश्वाभूता
कृतमाकायासासत्येत्यमृतेतिवसिष्ठः २८ आपोवाइद*सर्वंविश्वाभूतान्यापःप्रा
णावआपःपशवआपोन्नमापोमृतमापःसंम्राडापोविराडापःस्वराडापःछंदा*स्या
पोज्योती*ष्यापोयजू*ष्यापःसत्यमापःसर्वंदेवताआपोभूर्भुवःसुवराप ॐम् २९
आपःपुनंतुपृथिवींपृथिवीपूतापुनातुमां। पुनंतुब्रह्मणःस्पतिर्ब्रह्मपूतापुनातुमां।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदुच्छिष्टमभोज्यंयद्वादुश्चरितंमम । सर्वंपुनंतुमामापोंसतांचप्रतिग्रहꣳ स्वाहा ३० अग्निश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः । पापेभ्योरक्षंतां । यदन्हापापमकार्षं । मनसावाचाहस्ताभ्यां । पद्भ्यामुदरेणशिश्ना । अहस्तदवलुंपतु । यत्किंचदुरितंमयिं । इदमहंमाममृतयोनौ । सत्येज्योतिषिजुहोमिस्वाहा ३१ सूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः । पापेभ्योरक्षंतां । यद्रात्रियापापमकार्षं । मनसा वाचाहस्ताभ्यां । पद्भ्यामुदरेणशिश्ना । रात्रिस्तदवलुंपतु । यत्किंचदुरितंमयिं । इदमहंमाममृतयोनौ । सूर्येज्योतिषिजुहोमिस्वाहा ३२ ओमित्येकाक्षरंब्रह्म । अग्निर्देवताब्रह्मइत्यार्षं । गायत्रंछंदंपरमात्मंसरूपं । सायुज्यंविनियोगं ३३ आयातुवरदादेविअक्षरेब्रम्हसंमितं । गायत्रीछंदसांमातेदंब्रह्मजुषस्वमे । यदन्हातत्कुरुते पापंतदन्हात्प्रातिमुच्यते । यद्रात्रियात्कुरुतेपापंतद्रात्रियात्प्रतिमुच्यते । सर्ववर्णेमहादेविसंध्याविद्येसरस्वति ३४ ओजोसिसहोसिबलमसिभ्राजोसिदेवानां

धामनामासिविश्वंमसिविश्वायुःसर्वंमसिसर्वायुरभिभूरों । गायत्रीमावाहयामि-सावित्रीमावाहयामिसरस्वतीमावाहयामिछंदऋषींनावाहयामिश्रियमावाहयामि । गायत्रियागायत्रीछंदोविश्वामित्रऋषिःसवितादेवताऽग्निर्मुखंब्रम्हाशिरोविष्णुर्हृदयꣳ रुद्रःशिखापृथिवीयोनिप्राणापानव्यानोदानसमानासप्राणाश्वेतवर्णासांख्यायनसगोत्रागायत्रीचतुर्विꣳशत्यक्षरात्रिपदाषट्कुक्षिःपंचशीर्षोपनयनेविनियोगः । ॐ भूः ॐभुवः ॐ सुवः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि । धियोयोनःप्रचोदयात् । ओमापोज्योतीरसोमृतंब्रम्हभूर्भुवःसुवरों ३५ उत्तमेशिखरेजातेभूम्यांपर्वतमूर्धनि । ब्राह्मणेभ्योभ्यनुज्ञातागच्छदेवियथासुखं । स्तुतोमयावरदावेदमाताप्रचोदयंतीपवनेद्विजाता । आयुःपृथिव्यांद्रविणंब्रह्मवर्चसंमह्यंदत्वाप्रजातुंब्रह्मलोकं । घृणिःसूर्यआदित्योनमभावात्यक्षरं । मधुक्षरंतितद्रसं । सत्यंवैतद्रसमापोज्योतीरसोमृतंब्रम्हभू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ भुर्वः सुवरों ३७ ब्रह्ममेतुमां। मधुमेतुमां। ब्रह्ममेवमधुमेतुमां। यास्तेसोमप्रजाव
त्सोभिसोअहं। दुष्वप्नहंदुरुष्वह। यास्तेसोमप्राणाꣳस्तांजुहोमि। त्रिसुपर्णम
याचितंब्राम्हणायंदद्यात्। ब्रम्हहत्यांवाएतेघ्नंति। येब्राम्हणास्त्रिसुपर्णंपठंति।
तेसोमंप्राप्नुवंति। आसहस्रात्पंक्तिंपुनंति ३८ ॐब्रह्ममेधयामधुमेधया। ब्रह्ममेव
मधुमेधया। अद्यानोदेवसवितःप्रजावत्सावीःसौभगं। परादुष्वप्नियꣳसुव। वि-
श्वानिदेवसवितर्दुरितानिपरासुवा। यद्भद्रंतन्मआसुव। मधुवाताऋतायतेमधु-
क्षरंतिसिंधवः। माध्वीर्नःसंत्वोषधीः। मधुनक्तमुतोषसिमधुमत्पार्थिवꣳरजः। म
धुद्यौरस्तुनःपिता। मधुमान्नोवनस्पतिर्मधुमाꣳ अस्तुसूर्यः। माध्वीर्गावोभवंतु-
नः। यइमंत्रिसुपर्णमयाचितंब्राम्हणायंदद्यात्। भ्रूणहत्यांवाएतेघ्नंति। येब्राम्ह
णास्त्रिसुपर्णंपठंति। तेसोमंप्राप्नुवंति। आसहस्रात्पंक्तिंपुनंति ॐ ३९ ब्रह्ममेध
वा। मधुमेधवा। ब्रह्ममेवमधुमेधवा। ब्रह्मादेवानांपदवीःकवीनामृषिर्विप्राणांम-

हिषोमृगाणां। श्येनोगृध्राणांस्वधितिर्वनानाꣳसोमपवित्रमत्येतिरेभन्। हꣳसः
शुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा
गोजाऋतजाअद्रिजाऋतंबृहत्। ऋचेत्वारुचेत्वासमित्स्रवंतिसरितोनधेनाः।
अंतर्हृदामनसापूयमानाः। घृतस्यधाराअभिचाकशीमि। हिरण्ययोवेतसोमध्य
आसां। तस्मिन्त्सुपर्णोमधुकृत्कुलायीभजन्नास्तेमधुदेवताभ्यः। तस्यासतेहरयः
सप्ततीरेस्वधांदुहानास्तमृतस्यधारां। यइदंत्रिसुपर्णमयाचितंब्राम्हणायंदद्यात्
वीरहत्यांवाएतेघ्नंति। येब्राम्हणास्त्रिसुपर्णंपठंति। तेसोमंप्राप्नुवंति। आसहस्रा
त्पंक्तिंपुनंति। ॐमेधादेवीजुषमाणान्नआगाद्विश्वाचीभद्रासुमनस्यमाना। त्वया
जुष्टानुदमानादुरुक्तान्बृहद्वदेमविदथेसुवीराः। त्वयाजुष्टऋषिर्भवतिदेवित्वया-
ब्रह्मागतश्रीरुतत्वया। त्वयाजुष्टश्चित्रंविंदतेवसुसानोजुषस्वद्रविणोनमेधे ४१
मेधांमइंद्रोददातुमेधांदेवीसरस्वती। मेधांमेअश्विनावुभावाधत्तांपुष्करस्रजा।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्सरासुचयामेधागँधर्वेषुचयन्मनः। दैवींमेधासरस्वतीसामाँमेधासुराभिर्जुष-
ता*स्वाहा ४२ आमाँमेधासुराभिर्विश्वरूपाहिरण्यवर्णाजगतीजगम्या। ऊर्जं
स्वतीपयसापिन्वमानासामाँमेधासुप्रतीकाजुषंतां। मयिमेधामयिप्रजांमय्यग्नि
स्तेजोदधातुमयिमेधांमयिप्रजांमयींद्रइंद्रियंदधातुमयिमेधांमयिप्रजांमयिसूर्यो
भ्राजोदधातु ४४ अपैतुमृत्युरमृतंनआगन्वैवस्वतोनोअभयंकृणोतु। पर्णवन
स्पतेरिवाभिनः शीयता *रयिः सचंतांनः शचीपतिं ४५ परंमृत्योअनुपरेहिपं-
थांयस्तेस्वइतरोदेवयानात्। चक्षुष्मतेशृण्वतेतेब्रवीमिमानःप्रजा* रीरिषोमो-
तवीरान् ४६ वातंप्राणंमनसान्वारंभामहेप्रजापतिंयोभुवनस्यगोपाः। सनोमृ-
त्योस्त्रायतांपात्व*हसोज्योग्जीवाजरामशीमहि ४७ अमुत्रभूयादधयद्यमस्यब्र
हस्पतेरभिशस्तेरमुंचः। प्रत्यौहतामश्विनामृत्युमस्माद्देवानामग्नेभिषजाशचीं-
भिः ४८ हरि*हरैतमनुयंतिदेवाविश्वस्येशानंवृषभंमतीनां। ब्रम्हसरूपमनुमे

दमागादयंनंमाविवंधीर्विक्रमस्व ४९ शक्वैरग्निमिंधानउभौलोकौसनेमहं। उभ
यौर्लोकयोर्ऋध्वातिमृत्युंतराम्यहं ५० माछिदोमृत्योमवंधीर्मामेबलंविवृहोमाप्र-
मोषीः। प्रजांमामेरीरिषआयुरुग्रनृचक्षसंत्वामहिषाविधेम५१मानोमहांतमुतमा
नोअर्भकंमानउक्षंतमुतमानउक्षितं। मानोवधीःपितरंमोतमातरंप्रियामानस्त-
नुवोरुद्ररीरिष५२मानस्तोकेतनयेमानवायुषिमानोगोषुमानोअश्वेषुरीरिषः। वी
रान्मानोरुद्रभामितोवधीर्हविष्मंतोनमसाविधेमते। प्रजापतेनत्वदेतान्यन्योवि-
श्वाजातानिपरिताबभूव। यत्कामास्तेजुहुमस्तन्नोअस्तुवय*स्यामपतयोरयीणां।
५४ स्वस्तिदाविशस्पतिर्वृत्रहाविमृधोवशी। वृषेंद्रःपुरएतुनःस्वस्तिदाअभयंक
रः ५५ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं। उर्वारुकमिवबंधनान्मृत्योर्मुक्षियमामृ
तात् ५६ येतैसहस्रंमयुतंपाशामृत्योमर्त्यायहंतवे। तान्यज्ञस्यमायया सर्वानवय
जामहे ५७ मृत्यवेस्वाहामृत्यवेस्वाहा ५८ देवकृतस्यैनसोवयजनमसिस्वाहा।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनुष्यकृतस्यैनसोवयजनमसिस्वाहा । पितृकृतस्यैनसोवयजनमसिस्वाहा । आत्मकृतस्यैनसोवयजनमसिस्वाहा । अन्यकृतस्यैनसोवयजनमसिस्वाहा । अस्मत्कृतस्यैनसोवयजनमसिस्वाहा । यद्दिवाचनक्तंचैनश्चकृमतस्यावयजनमसि स्वाहा । यत्स्वपंतश्चजाग्रतश्चैनश्चकृमतस्यावयजनमसिस्वाहा । यत्सुषुप्तश्चजाग्रतश्चैनश्चकृमतस्यावयजनमसिस्वाहा । यद्दिद्वाꣳसश्चाविद्वाꣳसश्चैनश्चकृमतस्यावयजनमसिस्वाहा । एनसएनसोवयजनमसिस्वाहा ५९ यद्वौदेवाश्चकृमाजिव्हयागुरुमनसोवाप्रयुतीदेवहेडनं । अरावायोनौअभिदुच्छुनायतेतस्मिंतदेनोव सवोनिधैतनस्वाहा ६० कामोकार्षीन्नमोनमः । कामोकार्षीत्कामःकरोतिनाहंकरोमिकामःकर्तानाहंकर्ताकामःकारयितानाहंकारयिताएषतेकामकामायस्वाहा ६१ मन्युरकार्षीन्नमोनमः । मन्युरकार्षीन्मन्युःकरोतिनाहंकरोमिमन्युःकर्तानाहंकर्तामन्युःकारयितानाहंकारयिताएषतेमन्योमन्यवेस्वाहा ६२ तिलांजुहो-

मिसरसाꣳसपिष्टान्गंधारममचित्तेरमंतुस्वाहा । गावोहिरण्यंधनमन्नपानꣳसर्वैषाꣳश्रियैस्वाहा । श्रियंचलक्ष्मिंचपुष्टिंचकीर्तिंचानृण्यतां । ब्रम्हण्यंबहुपुत्रतां । श्रद्धामेधेप्रजासंददातुस्वाहा ६३ तिलाःकृष्णास्तिलाश्वेतास्तिलासौम्यावंशानुगाः । तिलाःपुनंतुमेपापंयत्किंचिद्दुरितंमयिस्वाहा । चोरस्यान्नंनवश्राद्धंब्रम्हहागुरुतल्पगः । गोस्तेयꣳसुरापानंभ्रूणहत्यातिलाशांतिꣳशमयंतुस्वाहा । श्रीश्चलक्ष्मीश्चपुष्टीश्चकीर्तिंचानृण्यतां । ब्रह्मण्यंबहुपुत्रतां । श्रद्धामेधेप्रज्ञातुजातवेदःसंददातुस्वाहा ६४ प्राणापानव्यानोदानसमानामेशुध्यंतांज्योतिरहंविरजाविपाप्माभूयासꣳस्वाहा । वाङ्मश्चक्षुश्रोत्रजिव्हाघ्राणरेतोबुध्याकूतिःसंकल्पामेशुध्यंतांज्योतिरहंविरजाविपाप्माभूयासꣳस्वाहा । त्वक्कर्ममाꣳसरुधिरमेदोमज्जास्नायवोस्थीनिमेशुध्यंतांज्योतिरहंविरजाविपाप्माभूयासꣳस्वाहा । शिरःपाणिपादपार्श्वपृष्ठोरूदरजंघशिश्नोपस्थपायवोमेशुध्यंतांज्योतिरहंविरजाविपाप्माभूया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वाहा। उत्तिष्ठपुरुषहरितपिंगलरोहिताक्षिदेहिदेहिददापयितामशुध्यंतां-
ज्योतिरहंविरजाविपाप्माभूयास्वाहा६५ पृथिव्यापस्तेजोवायुराकाशामेशु-
ध्यंतांज्योतिरहंविरजाविपाप्माभूयास्वाहा।शब्दस्पर्शरूपरसगंधामेशुध्यंतां
ज्योतिरहंविरजाविपाप्माभूयास्वाहा।मनोवाक्कायकर्माणिमेशुध्यंतांज्योतिरहं
विरजाविपाप्माभूयास्वाहा।अव्यक्तभावैरलंकारैर्ज्योतिरहंविरजाविपाप्माभू
यास्वाहा। आत्मामेशुध्यंतांज्योतिरहंविरजाविपाप्माभूयास्वाहा। अंतरा
त्मामेशुध्यंतांज्योतिरहंविरजाविपाप्माभूयास्वाहा। परमात्मामेशुध्यंतांज्यो
तिरहंविरजाविपाप्माभूयास्वाहा। क्षुधेस्वाहा क्षुत्पिपासायस्वाहा। विविटयै
स्वाहा। ऋग्विधानायस्वाहा। कषौत्कायस्वाहा।क्षुत्पिपासामलंज्येष्ठामलक्ष्मीनां
शयाम्यहं। अभूतिमसमृद्धिंचसर्वान्निर्णुदमेपाप्मानंस्वाहा। अन्नमयप्राणमयम
नोमयविज्ञानमयमानन्दमयमात्मामेशुध्यंतांज्योतिरहंविरजाविपाप्माभूयास्वाहा

स्वाहा ६६ अग्नयेस्वाहा। विश्वेभ्योदेवेभ्यःस्वाहा। ध्रुवायभूमायस्वाहा। ध्रुवाक्षि
तयेस्वाहा। अच्युताक्षितयेस्वाहा। अग्नयेस्विष्टकृतेस्वाहा। धर्मायस्वाहा। अधं-
मायस्वाहा। अद्भ्यःस्वाहा। ओषधिवनस्पतिभ्यस्वाहा १ रक्षोदेवजनेभ्यःस्वाहा
गृह्याभ्यःस्वाहा। अवसानेभ्यःस्वाहा। अवसानपतिभ्यःस्वाहा। सर्वभूतेभ्यःस्वा
हा। कामायस्वाहा। अंतरिक्षायस्वाहा। यदेजतिजगतियच्चचेष्टतियनाम्नोभा-
गोयन्नाम्नेस्वाहा। पृथिव्यैस्वाहा। अंतरिक्षायस्वाहा। दिवेस्वाहा। सूर्यायस्वा-
हा। चंद्रमसेस्वाहा। नक्षत्रेभ्यःस्वाहा। इंद्रायस्वाहा। बृहस्पतयेस्वाहा। प्रजा-
पतयेस्वाहा। ब्रह्मणेस्वाहा। स्वधापितृभ्यःस्वाहा। नमोरुद्रायपशुपतयेस्वाहा।
३ देवेभ्यस्वाहा। पितृभ्यःस्वधास्तु। भूतेभ्योनमः। मनुष्येभ्योहंता। प्रजापतये
स्वाहा। परमेष्ठिनेस्वाहा। यथाकूपःशतधारःसहस्रंधारोअक्षितः। एवामेअस्तु
धान्य सहस्रंधारमक्षितं। धनंधान्यैस्वाहा। येभूताःप्रचरंतिदिवानक्तंबलिंमि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च्छंतोवितुर्दस्यप्रेष्याः। तेभ्योबलिंपुष्टिकामोहरामिमयिपुष्टिंपुष्टिंपतिर्दधातु-
स्वाहा ६७ ॐ तत्ब्रह्मा। ॐ तद्वायुः। ॐ तदात्मा। ॐ तत्सत्यं। ॐ तत्सर्वं।
ॐ तत्पुरोर्नमः। अंतश्चरतिभूतेषुगुहायांविश्वमूर्तिषु। त्वंयज्ञस्त्वंवषट्कारस्त्वं
द्र स्त्वꣳरुद्रस्त्वंविष्णुस्त्वंब्रह्मत्वंप्रजापतिः। त्वंतदाप आपोज्योतीरसोमृतंब्रह्म
भूर्भुवस्सुवरोम् ६८ श्रद्धायांप्राणेनिविंष्टोमृतंजुहोमि। श्रद्धायांमपानेनिविंष्टोमृतं
जुहोमि। श्रद्धायांव्यानेनिविंष्टोमृतंजुहोमि। श्रद्धायांमुदानेनिविंष्टोमृतंजुहोमि
। श्रद्धायांसमानेनिविंष्टोमृतंजुहोमि। ब्रह्मणिमआत्मामृतत्वाय। अमृतोपस्तर
णमसि। श्रद्धायांप्राणेनिविंष्टोमृतंजुहोमि। शिवोमांविशाप्रदाहाय। प्राणायस्वा
हा। श्रद्धायांमपानेनिविंष्टोमृतंजुहोमि। शिवोमांविशाप्रदाहाय। अपानायस्वा-
हा। श्रद्धायांव्यानेनिविंष्टोमृतंजुहोमि। शिवोमांविशाप्रदाहय। व्यानायस्वाहा
। श्रद्धायांमुदानेनिविंष्टोमृतंजुहोमि। शिवोमांविशाप्रदाहाय। उदानायस्वाहा।

श्रद्धायाꣳसमानेनिविंष्टोमृतंजुहोमि। शिवोमांविशाप्रदाहाय। समानायस्वाहा।
ब्रह्मणिमआत्मामृतत्वाय। अमृतापिधानमसि ६९ श्रद्धायांप्राणेनिविश्यामृतꣳ
हुतं। प्राणमन्नेनाप्ययस्व। श्रद्धायांमपानेनिविश्यामृतꣳहुतं। अपानमन्नेनाप्याय
स्व। श्रद्धायांव्यानेनिविश्यामृतꣳहुतं। व्यानमन्नेनाप्यायस्व। श्रद्धायांमुदानेनि
विश्यामृतꣳहुतं। उदानमन्नेनाप्यायस्व। श्रद्धयाꣳसमानेनिविश्यामृतꣳहुतं। स
मानमन्नेनाप्यायस्व ७० अंगुष्ठमात्रःपुरुषोंगुष्ठंचसमाश्रितः। ईशःसर्वस्यजग
तःप्रभुप्रीणातिंविश्वभुक्७१वाङ्मआसन्। नसोःप्राणः। अक्ष्योश्चक्षुः। कर्णयोः
श्रोत्रं। बाहुवोर्बलं। उरुवोरोजःअरिष्टाविश्वान्यंगानितनूः। तनुवांमेसहनमस्ते
अस्तुमामाहिꣳसीः ७२ वयंःसुपर्णाउपसेदुरिंद्रंप्रियमेधाऋषयोनाधमानाः। अ-
पध्वांतमूर्णुहिपूर्धिचक्षुर्मुमुग्ध्यस्मान्निधयेवबद्धान् ७३ प्राणानांग्रंथिरसिरुद्रोमा
विशांतकः। तेनान्नेनाप्यायस्व ७४ नमोरुद्रायविष्णवेमृत्युर्मेपाहि ७५ त्वमग्नेद्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिस्त्वमाशुशुक्षणिस्त्वमद्यस्त्वमश्मनास्परि। त्वंवनेभ्यःस्त्वमोषधीभ्यःस्त्वन्नृ-
णांनृपतेजायसेशुचिः७६ शिवेनमेसंतिष्ठस्वस्योनेनमेसंतिष्ठस्वसुभूतेनमेसंति
ष्ठस्वब्रह्मवर्चसेनमेसंतिष्ठस्वयज्ञस्यर्धिमनुसंतिष्ठस्वोपतेयज्ञनमउपतेनमउपते
नमः७७सत्यंपरपरꣳसत्यꣳसत्यननसुवर्गाल्लोकाच्यवंतेकदाचनसताꣳहिसत्यं
तस्मात्सत्येरमंतेतपइतितपोनानशानात्परंयद्धिपरंतपस्तद्दुर्धर्षंतद्दुराधर्षंतस्मा
त्तपसिरमंतेदमइतिनियंतंब्रह्मचारिणः स्तस्माद्दमैरमंतेशमइत्यरण्येमुनयःस्त-
स्माच्छमैरमंते। दानमितिसर्वाणिभूतानिप्रशꣳसंतिदानान्नातिदुश्चरंतस्माद्दा
नेरमंतेधर्मइतिधर्मेणसर्वमिदंपरिगृहीतंधर्मान्नातिदुष्करंतस्माद्धर्मेरमंतेप्रजन
इतिभृयाꣳसस्तस्माद्भूइष्ठाः प्रजायंतेतस्माद्भूयिष्ठाः प्रजननेरमंतेग्नयइत्याहत-
स्मादग्नयआधातव्याअग्निहोत्रमित्याहतस्मादग्निहोत्रेरमंतेयज्ञइतियज्ञोहिदे-
वास्तस्माद्यज्ञेरमंतेमानसामितिविद्वाꣳसः स्तस्माद्विद्वाꣳसः एवमानसेरमंतेन्या

सइतिब्रम्हाब्रह्माहिपरःपरोहिब्रम्हातानिवाएतान्यवराणिपराꣳसिन्यामएवा-
त्यरेचयद्यएवंवेदेत्युपनिषत्७८ प्राजापत्योहारुणिःसुपर्णेयःप्रजापतिंपितरमु-
पससारकिंभगवंतःपरमंवदंतीतितस्मैप्रोवाचसत्येनवायुरावातिसत्येनादित्यो-
रोचतेदिविसत्यंवाचःप्रतिष्ठासत्येसर्वंप्रतिष्ठितंतस्मात्सत्यंपरमंवदंतितपसादे-
वादेवतामग्रंआयन्तपसर्षयःसुवरन्वविंदन्तपसासपत्नान्प्रणुदामारातिस्तप
सिसर्वंप्रतिष्ठितंतस्मात्तपःपरमंवदंतिदमैनदांताःकिल्बिषमवधून्वंतिदमैनब्रह्म
चारिणःसुवरगच्छन्दमोभूतानांदुराधर्षंदमैसर्वंप्रतिष्ठितंतस्माद्दमःपरमंवदंति-
शमैनशांताःशिवमाचरंतिशमैननाकंमुनयोन्वविंदन्छमोभूतानांदुराधर्षंछमैस
र्वंप्रतिष्ठितंतस्माच्छमःपरमंवदंतिदानंयज्ञानांवरूथंदक्षिणालोकेदातारꣳसर्वभू-
तान्युपजीवंतिदानेनारातीरपानुदंतदानेनद्विषंतोमित्राभवंतिदानेसर्वंप्रतिष्ठि-
तंतस्माद्दानंपरमंवदंतिधर्मोविश्वस्यजगतःप्रतिष्ठालोकधर्मिष्ठंप्रजाउपसर्पंतिध्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्मेणंपापमंपनुदंतिधर्मेसर्वंप्रतिंष्ठितंतस्मांद्धर्मंपरमंवदंतिप्रजननंवैप्रतिष्ठालोके साधुप्रजायांस्तंतुंतन्वानःपितृणामनृणोभवंतितदेवतस्याअनृणंतस्मांप्रजननं परमंवदंत्यथयोवैत्रयींविद्यादेवयानःपंथागार्हपत्यऋक्पृथिवीरथंतरमन्वाहार्य-पचनंयजुरंतरीक्षंवामदेव्यमाहवनीयःसामसुवर्गोलोकोबृहत्तस्मांद्बह्मीन्परमंव-दंत्यग्निहोत्र*सायंप्रातर्गृहाणांनिष्कृतिःस्विष्ट*सुहुतंयज्ञक्रतूनांप्रायण*सुवर्ग-स्यलोकस्यज्योतिःस्तस्मांदग्निहोत्रंपरमंवदंतियज्ञइतियज्ञेनहिदेवादिवंगत्वाय-ज्ञेनासुरानपानुदंतयज्ञेनद्विषंतोमित्राभवंतियज्ञेसर्वंप्रतिंष्ठितंतस्मांद्यज्ञंपरमंव-दंतिमानसंवैप्राजापत्यंपवित्रंमानसेनमनसासाधुपश्यतिमानसाऋषयःप्रजाअं सृजंतमानसेसर्वंप्रतिंष्ठितंतस्मांन्मानसंपरमंवदंतिंन्यासइत्याहुर्मनीषिणोब्रह्मा णंब्रह्माविश्वंःकर्तमःस्वयंभुप्रजापतिःसंवत्सरइतिसंवत्सरोसावादित्योयएष-आदित्येपुरुषःसपरमेष्टीब्रम्हात्मायाभिरादित्यस्तपंतिरश्मिभिस्ताभिःपर्जन्यो

वर्षतिपर्जन्यैनौषधिवनस्पतयःप्रजायंतओषधिवनस्पतिभिरन्नंभवत्यन्नेनप्रा-णाःप्राणैर्बलंबलेनतपसस्तपसाश्रद्धाश्रद्धयांमेधामेधयांमनीषांमनीषयामनो-मनसाशांतिःशांत्याचित्तंचित्तेनस्मृति*स्मृत्यास्मार*स्मरेणविज्ञानंविज्ञानेना त्मानंवेदयतितस्मांदन्नंददन्त्सर्वांण्येतानिंददात्यंनात्प्राणाभवंतिभूतानांप्रा-णैर्मनोमनसश्चविज्ञानंविज्ञानादानंदोब्रह्मयोनिःसवाएषपुरुषःपंचधापंचात्मा-येनसर्वंमिदंप्रोतंपृथिवीचांतरिक्षंचद्यौश्चदिशश्चावांतरदिशाश्चसवैसर्वंमिदंज गत्सृसभूत*सभ०यंजिज्ञासक्रुतऋंतजारायिष्ठाश्रद्धासत्योमहस्वान्तपसोवरि ष्ठाज्ञात्वांतमेवंमनसाहृदाचभूयोनमृत्युमुपयाहिविद्वान्तस्मांन्यासमेषान्तप-सामतिरिक्तमाहुर्वसुरण्वोविभूरसिप्राणेत्वमसिसंधाताब्रह्मंत्वमसिविश्वधृत्तेजो दास्त्वमस्यग्निरसिवर्चोदास्त्वमसिसूर्यस्यद्युम्नोदास्त्वमसिचंद्रमसउपयामगृ-हीतोसिब्रह्मणेत्वामहसऊँमित्यात्मानंयुंजीतैतद्वैमहोपनिषदंदेवानांगुह्यंयएवंवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं ब्रह्मणो महिमानं माप्नोति तस्माद्ब्रह्मणो महिमानमित्युपनिषत् ७९ तस्यै वं विदु-
षो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा ह
दयं यूपः काम आज्यं मन्युः पशुस्तपोग्निर्दमः शमयिता दक्षिणा वाग्घोता प्राण उद्गा
ता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीद्धावधियते सादीक्षा यदश्नाति तद्धविर्यत्पिबति
तदस्य सोमपानं यद्रमते तदुपसदो यत्सं चरत्युप विशत्युतिष्ठते च सप्रवर्ग्यो यं मु-
खं तदाहवनीयो या व्याहृतिरा हुतिर्यदस्य विज्ञानं तज्जुहोति यत्सायं प्रातरिति तत्स
मिधं यत्प्रातर्मध्यंदिन * सायं च तानि सवनानि येऽहोरात्रे ते दर्शपूर्णमासौ ये र्धमा
सा श्चमासाश्च ते चातुर्मास्यानि यऋतवस्ते पशुबंधाये संवत्सराश्च परिवत्सराश्च ते
हर्गणाः सर्ववेदसं वा एतत्सत्रं यन्मरणं तदवभृथ एतद्वै जरामर्यमग्निहोत्रं * त्सत्रं य-
एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वादित्यस्य सायुज्यं गच्छत्यथ यो
दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चंद्रमसः सायुज्यं * सलोकतां माप्नोत्ये-

तावै सूर्याचंद्रमसौ महिमानौ ब्राम्हणो विद्वानभिजयति तस्माद्ब्रह्मणो महिमानमा-
प्नोति तस्माद्ब्रह्मणो महिमानं ८० सहनाववतु । सहनौ भुनक्तु । सहवीर्यं करवावहै
। तेजस्विनावधीतमस्तु मा विद्विषावहै । ॐ शांतिः शांतिः शांतिः । ७ ॥

हें पुस्तक पुणें पेठ सदाशिव येथें नारो आपाजी गोडबोले यांचे "वृत्तप्रसारक" छापखान्यांत
भास्कर नारायण गोडबोले यांनीं छापून प्रसिद्ध केलें माहे नोव्हेंबर सन १९०२ इसवी.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इतिपंचोपनिषत् समाप्तः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=19.07.19 12:15
,TRANSFERRED=2019/07/19 at 12:32:11
,PAGES=46
,TYPE=STD
,NAME=S0001024
,Book Name=M-2009-PANCHOPANISHAT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection